Digitized by Arya Samaj Foundation Chennai and eGangotri

SANSKRIT SAHITYA PRISHAT
VOL-3 1933 G.K.U.

Digitized by Arya Samaj Foundation Chennai and eGangotri

080529

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080529

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्ष
संख्य

पं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्ष ३ Vol. 3
संख्या ३ ओ३म Number 3

080529

कश्मीर ... :

संस्कृत साहित्य परिषदः

त्रैमासिकं पत्रम्

'श्रीः'

RI-0472

Quarterly Journal of the

SANSKRIT SAHITYA PARISHAD

SRINAGAR, KASHMIR.

श्रीनगर पौष १९९१

Srinagar January 1935

सम्पादकौ

पं० नित्यानन्दः शास्त्री **पं० कुलभूषणः**

वार्षिकं मूल्यम् १।)

प्राप्ति स्थानम्—पं० कुलभूषणः सुन्वारबाग श्रीनगर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

विषय-सूची

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रमः	विषयः	लेखकः	पृष्ठः
१.	परीक्षा-गुण दोष विमर्शः	श्री पं० दीनानाथ शर्म्मा शास्त्री सारस्वतः 'मुलतान' सं०ध० संस्कृत कालेजाऽध्यापकः ...	१–६
२.	कश्मीरराजतरंगिणी	गोविंद राजदान एम. ए. शास्त्री ...	६–९
३.	भारत भूषणो महाराणा प्रतापः	कुलभूषण एल. आर. बी. पी. एण्ड एस. डी. पी. एच. (लंडन) ...	९–१२
४.	संस्कृतोन्नतिः	स्वामी ब्रह्मानन्द सरस्वती	१३–१५
५.	गीर्वाण गीः	पं० प्रेमनाथः रैनावाड़ीयः	१५–१६
६.	संस्कृत रहस्यम्	कुल भूषणः एल. आर. बी. पी. एंड एस. डी. पी. एच. (लंडन) ...	१७–२१
७.	संस्कृतोन्नतेरुपायाः	पं० श्रीधर भट्ट शास्त्री हाईस्कूल रैनावाड़ी ...	२२–२३
८.	संध्याभाष्यम्	पं० गोविन्द राजदान शास्त्री एम. ए. ...	२४–२६
९.	इन्द्रिय निग्रहोपदेशः	जैनाचार्यः श्री देवचन्द्र सूरिः बीकानेरतः ...	२७–२८
१०.	समालोचनम्	स० स ...	२९–
११.	शारदतो परिषदः कार्यम्	परिषमन्त्री ...	२९–३१
१२.	देवगिरः प्रसारः प्राचीनाविष्कारश्च	पं० रघूनाथ वाङ्गन शास्त्री शालान्दल श्रीनगर ...	३१–३५
१३.	संस्कृत वाङ्मयः संसारः	... ...	३६–३७

नोट--सर्वे लेखा लेखकानां भाषामतानुसारेणैव प्रकाश्यन्ते। तेषामुत्तरदायिनो लेखका एव न तु सम्पादकौ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीः

वर्ष ३ | पौष संवत् १९९१ वि० तदनुसार जनवरी १९३५ | पूर्ण संख्या ११ संख्या ३

परीक्षा·गुणदोष·विमर्शः ।

(निबन्धा—श्री पं० दीनानाथ शर्मा शास्त्री सारस्वतः । 'मुलतान' स्थ स० ध० संस्कृतकालेजाऽध्यापकः)

अस्मिञ्जगति, यस्मिन्नपि पदार्थे उत्तमेऽधमे वा, विमर्शस्पृशं दृशं प्रवर्त्तयामः; तत्रैवाऽस्माभिर्गुणा दोषाश्च परस्परं नान्तरीयकतया वर्त्तमाना निभाल्यन्ते । क्वचिद् गुणानां भूमा दोषाणाञ्चाऽणिमा, क्वचन च दोषाणां बंहिमा गुणानाञ्च ह्रसिमा विराजते—इति त्वन्यत्र; परमेकमेव वस्तु केवलं सगुणं निर्द्दोषञ्च, केवलं सदोषं निर्गुणञ्च कदाचिद् दृग्गोचरीचरीक्रियमाणं* न भविष्यतीति समसम्मतं मतं मतम् । आशास्यते—युक्तियुक्ते सर्व्वाऽनुभवविषये विषये-

* चरीक्रियमाणम् । चर्करीतान्तात् कृरोतेः कर्म्मणि शानच । यङन्तात्तु चेक्रीय्यमाणमिति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऽमुष्मिन् प्रायो न भवितुमर्हेद् विसंवादः कस्याऽपि निशितमनीषा-शालिनोऽपि । कोऽपि श्रीमानेतत्प्रत्युदाहरणे परमात्मानमुपाददीत, आध्यात्मिकविषयगवेषणयाऽऽप्तोपदेशांश्च प्रदर्श्याऽस्मद्-भणितिं प्रत्यादेष्टुमभिलषेत्; परं साऽऽस्तिकयकोटिः—अथवैतदेव कथ्यम्—पारतन्त्र्यवेदी भविष्यति, याऽत्र स्वातन्त्र्यवेद्याम् अर्द्धचन्द्रायिता-(गलहस्तायिता) मता । स्वातन्त्र्यवेद्यान्तु निर्विकारः परमेशानोऽपि* बहुदोषोऽस्ति, दयालुरपि स† जनार्द्दनोऽस्ति, शिवोऽप्यसौ रुद्रः, धाताऽपि द्रुहिणः‡ । इत्थं सोऽपि समालोचनाकोटित आत्मान न त्रातुमीष्टे ।

भवतु—त्यज्यतेऽप्रकृतम् । प्रकृतमनुसरामः—विकीर्य्यतां दृष्टि-कोणः इतस्ततः । नितान्ततान्तस्वान्तशान्तताकर्त्तरि सुधांशौ सितिमाऽऽह्लादकत्वं सौन्दर्य्यम्—इमे गुणाः सन्ति; दोषोऽपि तत्र लाञ्छनरूपेण विराजत एव । असौ दोष एव तस्य गुणविकासे सहा-यकः स्यादिति तु§ अन्यत्; परं स वर्त्तते दोषव्यपदेशभागेव एव । विदूषकस्य काणत्वमपि वामनत्वमपि वा तस्य हास्यरसप्राचुर्य्यस्य सहायकं सदपि दोषव्यपदेशभागेव । पाटलपुष्पं सुगन्धादिना चेतोहारि भवति, परं कण्टकास्तत्राऽपि स्वस्वत्वं न जातु हातुमीशते । प्रसिद्ध-सुखखनौ स्वर्गेऽपि 'क्षीणे पुण्ये मर्त्यलोकं विशन्ती' ति दोषोऽपि जागर्त्त्येव ।

अस्पृश्यादिदोषदिग्धोऽपि श्वा स्वामिभक्त्यादिगुणगणवि-शिष्टोऽपि भवति । कृष्णोऽपि कोकिलः काकलीकलकलैर्हृदयमन्दा-नन्दकन्दलं वितनुते । चर्म्ममय्यप्युपानत् कण्टकेभ्यो रक्षाम्, उन्नता-

---

* बहुदोषः । पक्षे बहुभुजः, 'दोस्' शब्दाद् भागुरिमते टाप्, 'दोर्दोषा च भुजो बाहुरिति धनंजयः ।† जनार्दनः—जनपीडकः, पक्षे-जनः-जन्म तमर्द्दयति ।

‡ द्रुहिणः—द्रुह्यतीति, पक्षे द्रुह्यति दुष्टेभ्यः ।

§ तु अन्यत् । 'इकोऽसवर्णे' इति पर्ज्जन्यवल्लक्षण प्रवृत्त्या ह्रस्वस्याऽपि ह्रस्वः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नतप्रदेशाऽऽरोहणे सहायताम्, वृश्चिकानां विनाशञ्च कुर्व्वती गुणिगण-गणनीयैव। किम्बहुना—'दोष' शब्दोऽपि 'गुण'युक्तः; (यतो हि दुष (दि० प० अ०) धातोर्घञि लघूपधगुण एव दोषशब्दनिष्पत्तिः)। एवञ्च 'गुण' शब्दोऽपि 'दोष' युक्तः (यतस्स गुणीति व्यपदेशं वहन्नपि गुणयुक्तो* नाऽस्ति, किन्तु अगुण एव, अगुणो दोषश्चेति मिथः पर्य्यायावेव)।

फलतः सर्व्वमपि सगुणं किञ्चिद्दोषयुक्तमपि, सर्व्वमपि सदोषं किञ्चिद् गुणयुक्तमपि भवति। नाऽत्र 'ननु नच किन्तु परन्तु' इत्यस्य प्रयोजनीयता।—तदेवमेवाऽस्मदीया समालोच्या श्रीमती 'परीक्षा-देवी' अपि तादृक्कोटितो न बहिर्भूता, दोषगुणगतिमतिक्रम्य वा न वर्त्तते। तथाऽपि तत्रेदमेव विमर्शनीयं† वर्त्तते विषये, यत्-परीक्षाणां गुणानां बाहुल्यं दोषाणामणीयस्त्वं वा वर्त्तते, आहोस्विद्-दोषा-णाम्प्राचुरी गुणानान्नैयूनी‡ वा वर्व्वर्त्ति; अथवेदमेव वाच्यं यद्—अमुष्यां के दोषाः के वा गुणाः। वयं मितमतिद्वारा विवृण्महेऽमुं-विषयम्। अत्र गुण-दोषयोः कस्याऽतिरेक इत्यस्योत्तरपक्षे वयं 'श्रियाः'§ पाठकानां शेमुषीमेव निदध्मः। अथाऽधुना विव्रियते—विवरणात् प्राक् तान् महोदयान् क्षमामभ्यर्थयामहे, ये परीक्षामेव कल्प-वृक्षकल्पां मन्वते, तदुत्कलिकाऽऽकुला एव च विद्यन्ते; ते प्रदर्श-माणानस्मदीयदोषान्न पश्यन्तु। तेऽपि च क्षाम्यन्त्वस्मान्, ये किलसकलाऽवयवविकलाममूमामनन्ति, ते खलु श्रीमन्तोऽस्या वक्ष्यमा-णगुणान्न लोकन्ताम्। अथ चैतदप्यवधेयम्, यदत्र 'परीक्षा' इत्यनेन

---

* अदन्त गुण (चु० उ० से०) धातोरल्लोपे तस्य स्थानिवत्त्वेन न गुणः।

† विमर्शनीयम्। निषिद्धव्यवधानान्न गुणः।

‡ नैयूनी। न्यूनस्य भावः। 'गुणवचन' तिष्यञ्। 'नटवाभ्याम्' इत्यैच्। वित्त्वान्ङीप्। 'यस्येति च' त्यल्लोपः।

§ श्रियाः। 'ङिति ह्रस्वश्च' इति वा नदीत्वम्, ततश्च 'आण्नद्याः'।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्देन वर्तमानपञ्चनदीयादिविश्वविद्यालय (University) परीक्षा एव समालुलोचयिषिताः न तु साधारण्योऽपि । यद्यपि तावदत्रैतच्छक्यते वक्तुं यद्—निर्देक्ष्यमाणा दोषा ऽ परीक्षोपादानकारणका न सन्ति, किन्तु परीक्षार्थिनो विद्यार्थिन एवाऽमीषां कारणम्, अथवा शिक्षापद्धतिरेवाऽत्र दोषभाक्, तथापि परीक्षासङ्गादेव सर्व्वञ्छिदिदम्भवतीत्यतऽ परीक्षायामेव सङ्क्रान्ता मन्यन्ते दोषा अमी । तदेवमवसायाऽग्रे पदं निधेयम् ।

परीक्षायाम् 'उत्तीर्ण्णताऽनुत्तीर्ण्णता' च इति द्वौ शब्दौ संश्लिष्टौ स्तः । तत्राऽनुत्तीर्ण्णता-इत्ययं शब्द ईदृग्भीषणतां गाहते, यन्न प्रष्टव्या तत्कथा । परीक्षां समाप्य वराका योग्या विद्यार्थिनोऽपि 'न ज्ञायते-विधाता किं विधाता ? कदाचिद-नुत्तीर्णास्तु न भविष्यामः ?' इति चिन्तासन्ताननितान्ततान्ता भवन्ति । तेनैव तेषां वपुः कृशिमानमालिङ्गते, रक्तं शुष्यति, अस्वास्थ्यं प्ररोहति । भविष्यद्प्रतिष्ठाभीतिभीतास्ते वराका लोकान् मुखमपि नो दर्शयन्ति । प्रतिनिशं दुःस्वप्नान् पश्यन्तो मध्येर चीत्कारं कारङ्कारं जाग्रति, नैराश्याऽविधस्नाताश्च विवर्णा इव भवन्ति । केचिन्मत्तमतयस्सन्तो विचारयन्ति, यदनुत्तीर्णातायां विषं प्रजग्ध्य, गभीरे कूपे वा निमज्ज्य, बाष्पयानसरणौ वा निपत्य, भृगुपतनं वा समनुष्ठायाऽऽत्मानं व्यापादयिष्यामः । पुनरपरे विचिन्तयन्ति, वयं स्वगृहाद् विनिष्क्रम्य अन्यत्राऽपरिचितप्रदेशं यास्यामः । हा हन्त ! तेषां विपत्तिततिकथा कथमिव कथयितुं शक्येत । वराकाणां पितरावपि ताम्यतः, पत्न्योऽपि बिभ्यति, यदयम् अदयं कदाचिदात्मानं न हन्यात् । एतानि कष्टानि तु केवलम् उदर्कोदयात् प्रागेव भवन्ति । उदर्कोदये तु तत्राऽपि दुरुदर्कोदये तु पाठका अनुमातुमीशत एव, यत्-कथन्तेषु शम्पासम्पात इव जायते, का वा न भवति तदीया दुखस्था । अस्तु-त्यज्यताम्, श्रीमतां किन्तया चिन्तया । अथ चैतदपि जानते पाठकमहाभागाः, यत्—परीक्षासमनन्तरमेव नव्यपाठोऽपि प्रारभ्यते विद्यालयेषु । तत्र न खलूत्तीर्णाभविष्यन्त

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आगच्छन्ति, नचाऽनुत्तीर्णाभविष्यन्तः। उत्तीर्णाभविष्यन्तोऽनुत्तीर्ण-ताभिया नागच्छन्ति।—यद् यद्यग्रिमश्रेण्यां पाठमारभेमहि, तर्हि कदाचिदनुत्तीर्णतायां सत्यां महती लज्जा स्यात्; अधीतचरश्रेण्यां पाठश्रवणन्तु तदानीमेव लज्जाकरं स्यात्। अनुत्तीर्णा-भविष्यतान्त्वेत-दर्थमनागमनम्, यत्-कदाचिदुत्तीर्णा भवेम, 'शल्यो जेष्यति पाण्डवान्' इति दौर्योधनी दुराशेव तेषामपि हृदयक्षेत्रे आशाङ्कुरः प्ररोहत्येव, प्रविष्टचरश्रेण्याञ्च पठनन्तेषामपि कृते लज्जास्पदं प्रतीयते। अस्तु—एवञ्चोभयेषामेव महीयसी क्षतिर्भवति।

उत्तीर्णास्तु यदा स्वसुदर्कं शृण्वन्ति, नवीनग्रन्थानारब्धुञ्चोद्य-च्छन्ति* तदा विद्यालये मासद्वयाऽनन्तरमागम्य पर्य्याप्तम्पाठम्पाठितं पश्यन्ति। इतश्च पञ्चषदिवससमनन्तरमेव ग्रैष्माऽवकाशोऽपि जायते। नवीनपठितम्प्रकरणञ्च आरम्भिकज्ञानाऽभावादेष्ववकाशेषु शीघ्रमेव विस्मर्य्यते तैः। ततोऽवकाशाऽनन्तरं सैव दुरवस्था, यतोऽध्यापक-महोदयाः स्वपाठितादग्र एव पाठम्प्रचालयन्ति। पाठो मस्तिष्कन्नाप्नोति तदा त एव विद्यार्थिनः कदाचिदध्यापकान्निन्दन्ति, जातुचिद्विद्यालयम्। यद्यपि प्रत्येकश्रेण्या विभागद्वयस्थापनेन परीक्षोत्तरं ग्रीष्माऽवकाश-करणेन वा ईदृशी त्रुटिः प्रायो न भवितुमर्हति, तथाऽपि पाठकमहा-भागा जानन्त्येव, यत्-संस्कृतविद्यालयेषु भवति धनस्य दारिद्र्यम्, अत एव तत्र शिक्षाऽध्यक्षाणामल्पता स्वाभाविक्येव। आधिक्येऽपि उत्ती-र्णताऽऽरम्भकाले तादवस्थ्यं दुर्निवारमेव। अथ च ग्रीष्माऽवकाशा अत्र प्रायो जुलाईमासे भवन्ति, परीक्षा च मईमास एव। एतस्मिन्न-न्तरे पाठः प्रचलत्येवाऽत्रत्यविद्यालयेषु। अनुत्तीर्णानामपीयमेव दुर्गतिर्भवति; प्रत्युत एतदपेक्ष्याऽपि अधिकायते तद्दौर्गत्यम्; यतोऽनु-त्तीर्णानां सतां तेषां धननाशः प्रतिष्ठानाशः परिश्रमवैयर्थ्यम् इत्यादि सर्व्वन्तु जातमेव, ततोऽग्रिमपाठेऽपि 'पूर्व्ववद्धानि-सँव्वृत्ता। उत्साह-

---

* उद्यच्छन्ति। 'समुदाङ्भ्यो यम' इति तङ् तु न, 'अग्रन्थे' इति व्युदासात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाशात्तैरग्रिमपरिश्रमोऽपि दुष्करो * भवति। एवं ते 'क्षते प्रहारा निपतन्त्यभीक्ष्णम्' इत्यस्य निदर्शनम्भवन्ति।

पाठका अत्रैतदपि कथयितुं शक्ष्यन्ति, यत्—किमु विद्यार्थिनः स्वलिखितपत्रैः स्वोत्तीर्णताऽनुत्तीर्णते † अपि नाऽवसातुं शक्ताः? येन ते ईदृशीं हानिं लभन्त इति। तत्राऽस्माभिस्तदीयसन्देहसन्दोहापोहायैतदेव कथयितुं पार्यते, यद् 'न' इति। वयं स्वयं बहुधाऽपश्याम, यद्—यस्मिन् विद्यार्थिनि अध्यापकस्य तदुत्तीर्णताविषये महिष्ठो विश्वास आसीत्, स तु कदाचिदनुत्तीर्णतामापद्यते, यस्मिँश्च न तथा, स खलु जातु उत्तीर्णतामापन्नो दृश्यते, एतदुदन्ताऽवगन्ताऽध्यापकाऽन्तरनिकरोऽपि स्यादिति मन्ये। अत एवाऽधुना योग्यतैवोत्तीर्णतासाधनं नाऽस्माभिर्मन्यते, किन्न्विदम्मूलनिविष्टं किमप्यसाधारणं कारणं मीमांसनीयमवेमः। तेनैवाऽधुना योग्यादपि योग्यतमे उत्तीर्णताया विश्वासो नाऽवतिष्ठते; तस्मादेवाऽधस्तादुक्ता दुरवस्था दरीदृश्यते।

कश्मीरराजतरंगिणी

(पूर्वतोऽनुवर्तते)

[ले०—गोविन्द राजदान एम. ए. शास्त्री]

द्वितीयस्तरंगः

भ्रातृव्यो हुसनस्यैवं राज्यं लुहरचक्कः।
ईब्दालस्य सहायेन मित्रस्याथ स प्राप्तवान्॥
हितैषी स बलाध्यक्षपदं राजप्रसादतः।
अवाप्तवांस्तथेब्दालो मिथस्तर्ष विधानतः॥
राजर्षिरिव भूपोऽसौ प्रजाः सम्यक्पपाल सः।
तस्याभूच्चित्तवृत्तिस्तु पौरकल्याणकारिणी॥

---

* तैर्दुष्करः। खलु। 'न लोका—' इति खलुत्वेन षष्ठीनिषेधात्तृतीया।

† अनुत्तीर्णते अपि। 'ईदूदेद्द्विव—' इति प्रगृह्यत्वात् प्रकृतिभावः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूल्यं धान्यादिवस्तूनां स्वल्पमेव स निर्दिशन् ।
दर्शयामास स्वां वृत्तिं प्रजानां रञ्जने रतः ॥
अथैकविंशमाषाणां ताम्राणां मुद्रया जनैः ।
संकेत्या धान्यखारीति भूमिपोऽनुशशास सः ॥
विचिक्रियुः कान्दविका यूपं स्वविपणावपि ।
राज्ये मे मुद्रया सार्धदशमाषैकरूपया ॥
वेल्लद्यशो दुगूलस्य जगाम तस्य शासने ।
लुहुर्भुण्डेति विख्यातिं यूपः कश्मीरमण्डले ॥
योसभश्च प्रचलितः प्रायाद् दिल्लीपुरं ततः ।
मासोनो हायनस्तेन यापितो यत्र दीनवत् ॥
ततः सोऽभ्यर्थयामास सम्राजं देहलीश्वरम् ।
साहाय्यकार्थं जेतुं तु कश्मीरान् शरणंगतः ॥
सम्राडकबरशाहोऽप्रायच्छत् सैनिकांस्ततः ।
मिर्जायोसोभ्मानसिंहाभ्यां साकं मंत्रिभ्यां तदा ॥
काम्बोज विषयं प्राप्तायैवमथ व्यपेतभीः ।
ईब्दालः प्राहिणोल्लेखं हृष्टाय योसभाय सः ॥
राज्यं स्वकीयं तव का भीतिरागच्छ सत्वरम् ।
सम्राजः सैन्यवृन्दं त्वं किमर्थमानयेर्वृथा ॥
चेत्सैन्यं प्रविशेत्पुर्यां ध्रुवं राज्यं विनश्यति ।
मनसोऽप्यभिलाषा ते न कथञ्चित्प्रसिद्ध्यति ॥
मंत्रिणौ किन्त्वपृष्ट्वैव योसभो मानमिर्जकौ ।
लवपुरीयव्यापारिकेभ्यः प्राप्य तदा धनम् ॥
पूर्वप्रचलितैस्तैस्तैः कश्मीरराष्ट्रियैः समम् ।
सेनां समादाय चतुःसहस्र संख्ययान्विताम् ॥
कश्मीरानागतो जेतुं प्रमादी स त्वरान्वितः ।
चकारोपद्रवं तूर्णं धूमकेतुरिवोत्थितः ॥
श्रुत्वैतन्मानमिर्जभ्यां सम्राट् चक्रोध दीहले ।
पुरेस्थितोऽपि तौ प्रत्यानायदथ दुःखितः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राप्तं राजपुरे देशे ससैन्यं योसभं तदा ।
ज्ञात्वा योद्धुं निर्जगाम सज्ज ईब्दालचक्रकः ॥
लुहुर्चक्रो हुसनजं योसभमागतं तथा ।
हुसैनतनयं चैवमीभखानाभिधानकम् ॥
वीरौ तौ बद्धसन्नाहौ विज्ञाय सेनयान्वितौ ।
आकारयत्स्वान्तिकं स स्वयं शूरपुरे स्थितः ॥
प्राप्तावप्रक्ननगरे संगतौ योसभेन तौ ।
मेरर्हुसैनशंसद्भुभौ हामगुल्लेथ संस्थितौ ॥
लेखैः संधिं व्यधात्पूर्वराज्ञा सैदेन चत्वरः ।
योसभस्त्वयि सैन्यार्धं प्रेषयित्वा जगाम च ॥
वराहमूलमार्गेण स्वयं स्वय्यपुरं ततः ।
लहरं क्रामराज्यं च स्वात्मसात्सञ्चकारह ॥
अथेब्दालोऽप्यलीचक्रमुन्मुच्य सेनया युतः ।
प्राद्रुवत्तं स्वय्यपुरान्निष्कासयितुमुद्यतः ॥
वारुणीतो वितस्तयाः स्कन्दवारानिबन्धनात् ।
रेजे सैन्यैरथेब्दालः पौलस्त्यो राक्षसैरिव ॥
योसभोऽप्युत्तरे भागे बलाधिष्ठितपौरुषः ।
स्पर्धालुरासीदुद्युक्तस्तमथ–क्रमितुमरिम् ॥
किञ्चित्कालं जयस्त्वासीद्युद्धयतोः संशयावहः ।
खोयग्रामाध्वना जेतुमीब्दालोऽगात् ततो ध्रुवम् ॥
हैदरं चक्रजातीयं प्रेषयन्मदगर्वितः ।
ईब्दालभ्रातालीभट्टः सशाठ्यं योसभान्तिकम् ॥
लेखं खलीलभाभद्रराप्येवमथ स प्राहिणोत् ।
अपाकर्तुं तु छद्मेन धूर्तस्तं कूटनीतिवित् ॥
राष्ट्रिया निखिलास्ते हि लुहरेणैव संगताः ।
ईब्दालेनैव त्वन्नाशकटिबद्धाः सनिश्चयाः ॥
ससैन्यो हैदरो मूर्खः प्रातः भोसंगराध्वना ।
पशुं पशुघ्न इव त्वामेत्य व्यापादयिष्यति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वत्पितृदासो भूत्वाहं लिखामि हितकांक्षया ।
निर्गन्तव्यं त्वत: स्वय्यपुरात्पर्णोत्समार्गतः ।।
तत्पत्रं प्राप्य तस्याभिप्रायं ज्ञात्वा च सत्वरम् ।
योसभस्तूत्तरं प्रादाद्विदितं तव वञ्चनम् ।।
मेत: सज्जस्व स्वां सेनां युद्धाय कृतनिश्चयः ।
आगच्छ दुष्ट रे मूर्ख दर्शय त्वं स्वविक्रमम् ।।
ज्ञातोत्तरः खलीलभाभद्वारा ईन्दालको व्यधात् ।
पारेच्छितस्तं स्वां पृतनां दिलीन् ग्रामोपशल्यके ।।
योसभस्तारयित्वाथाध्वगः सेनायुतेन सः ।
ईन्दालेनाप्यथाक्रान्तश्चिरं च युयुधे ततः ।।
परिश्रान्तो निर्बलश्च संत्यक्तराज्यलाञ्छनः ।
जगाम लहरोऽप्यन्यं चलितस्तूपवर्तनम् ।।
मासमेकं विधायैवं राज्यं कश्मीरमंडले ।
लहरोऽस्तमयाच्चन्द्र इवाह्लादकरो दिवा ।।

भारतभूषणो महाराणा प्रतापः ।

(३)

(पूर्वावशिष्टः)

पृथ्वीराज भगिनी-प्रेम—

महाराजबीकानीरबन्धोः पृथ्वीराजस्य भगिन्या निसर्गत एव मेवाडयुवराजेन साकमासीत्स्नेहः । बहवो राजपूतनृपतयो यद्यपि सम्राजोऽक्बरस्याधीना आसन् तथापि स्वाभाविकं प्रेम राजपूतमेदिनी-स्वातन्त्र्यरक्षणतत्पराय वीरप्रतापसिंहायैवादर्शयन्नधिकम् । सिसोदिया-वंशकुलभूषणस्य महाराजप्रतापसिंहस्य दिल्लीपतेराज्ञाकारिराजपूत-राजभिः सह भोजनविवाहव्यवहारेष्वसंबन्धरूपा प्रतिज्ञा आसीत् । जानन्त्यप्येवं निखिलं वृत्तं राजकुमारी पृथ्वीराजभगिनी महाराज-सेवाचरणशीला वने निवसतः सपरिवारस्य महाराजस्यान्तिकमाज-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गाम। अतिशयेन भक्तिं दर्शयन्ती महिषीमहाराजानौ प्रेम्णा सेवाव्यापारैश्च सन्तोषयन्तो राजकुमारस्य दर्शनमात्रमेव सुखमनुभवन्तो घोरासु निर्जनपर्वताधित्यकासु तैरेव साकं कालं निनाय । परिचचार च वीराङ्गना तु तां स्नुषेव महाराज्ञी । कदाचित् सा वीराङ्गना खङ्गासिकरा सहसा शत्रुमाक्रम्य तद्धन्तान् विदार्य च दृष्टपराक्रमा प्रतापसिंहस्य स्नेहपात्रतां आससाद परन्तु सत्यव्रतेन तेन स्वपुत्रपरिणययोग्या तथापि न परिगणिता । शत्रुशस्त्रप्रहारैश्छिन्नदेहा महाराजस्य सत्यप्रतिज्ञाव्रतपालनमनस्का राजकुमारस्य प्रियतमा सा राजपूतललना स्मितमुखी तत्रैव प्राणानत्याक्षीत् महाराजपरिवारं च शोकसागरे पातयामास ।

वीरशूरस्य प्रतापसिंहस्य धैर्यच्युतिः

अरण्यवासेन परःसहस्राणि दुःखान्यनु भवतोराजपूतललामस्य स्वातन्त्र्यव्रतप्रियस्य महाराजप्रतापसिंहस्यैकदा धैर्यं घटनयैकया च्युतमभूत् । यद् धैर्यमसंख्यानि दुःखान्यनुभवतः प्राणप्रियचेतकाश्वत्यागेन वा हृदयानन्दवर्धिन्याः पृथ्वीराजभगिन्याः प्राणत्यागेन वा मेवाडदेशे शत्रोर्हस्तंगते वा कथंचिदपि न्यूनतां नागच्छत् तद्बालकविलापसंतापदुःखेन विगलितप्रायमिवाभूत् ।

एकदा नितान्तं त्रिदिनं शत्रुभिरनिशं पीड्यमानेन पर्वतात्पर्वतं स्वशरीररक्षायायाहिण्डमानेन वीरप्रतापेन क्वचिदपि नावाप्ता भोजनसामग्री । तृतीये दिवसे तु वनेचरैरानीतायाः सामग्र्या महाराज्ञी मातृस्नेहेन बालान् सन्तोषयितुं स्वयमपूपविधानमकरोत् । बालेभ्यो वितीर्यापूपचरुं यावत् कनीयान् पुत्रो भोजनग्रासं स्वमुखे क्षेप्तुमयतत तावदेव वन्यो मार्जारः कश्चन तस्य हस्ताद् बलादाहृत्य तत्सर्वमपूपादिकमादत् । बुभुक्षापीडितो बालो दिष्टया कतिपयदिवसानन्तरमाप्तभोजनो दुर्दैवेनापहृतं विज्ञाय तत्सकलं भोजनादिकं तारस्वरं चुक्रोष । महाराजोऽपि तमङ्के निधाय बालकं सान्त्वयन् अत्यर्थमेव रुरोद । च्युतधैर्यः कमपि आकस्मिकमनिष्टमाशङ्कयामास । अथ च निःश्वस्यैवं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बभाषे "धिङ्! मां यद्बालकानामपि स्वकीयानां पालनेऽनर्होऽस्मि संवृत्तः शीघ्रमेवेदानीमकबराय सम्राजे पत्रं लिखेयम् यत् शत्रुता तु तस्य मया सह न च मम बालकैः। कृतप्रतिज्ञोहं मेवाडमेदिनीस्वातन्त्र्यापादने लग्नोऽपि परः सहस्राणि दुःखानि वर्षेभ्योऽनेकेभ्योऽनुभवामि न च दृश्यते कठिनस्यैतादृशस्य कर्मणः सिद्धिरुदर्को वा।

अतिकठोराणि विचित्राण्यालापविलापमयानि वचनान्यनेकानि तानि श्रुत्वा महाराज्ञी वनेचराश्च सर्वे तं धैर्यावलम्बाय मुहुर्मुहुः प्रार्थयामासुः। परन्तु दिवसात्तस्मान् न किमपि सम्यक् विचारयतिस्म भग्नवृतिरौदासीन्यभावेन स्थितो महाराजः। च्युतधैर्यस्य मनसस्तस्यावस्थां केनचिदक्बरपक्षपातकारिणा निशम्य तस्य नाम्ना स्वकपोलकल्पितं संधिमयं प्रार्थनापत्रमेकं सम्राज्ञे प्रेषितम्। लब्धदलेनाक्बरेणापि तथ्यमेव तन्मन्यमानेन स्वात्मा धन्योऽमन्यत नानाविधा हर्षोत्सवा अप्यरच्यन्त। तस्मिन्नेवाहनि राजसभायां पत्रं तच्छ्रावयामास। तच्छ्रवणेन मुगलराज्याधिकारिणो यवनाः सम्राट् पक्षपातिनो मानसिंहप्रभृतयो राजपूतक्षत्रिया अत्यन्तं मुमोदुः। परन्तु राजपूतसामन्ता मानधन नृपतयश्च देहलीराजसभामलकुर्वन्तो वार्तामिमामतथ्यामेव विचार्य मेवाडाधिपतये प्रतापसिंहाय शिवमेव संकल्पयांबभूवुः। तेषु मध्ये बीकानीरराजबन्धुना पृथ्वीराजेन सम्राडक्बर एवं प्रार्थितोऽपि "दिल्लीपते! नास्ति बहूनामस्माकं विश्वासोऽस्मिन् प्रत्ययो वा पत्रे एवं च प्रतीयते यत् वीराग्रगण्यप्रतापसिंहस्य शत्रुणा केनचिद्विरोधविवर्धनायैव दृढप्रतिज्ञस्य च प्रतिज्ञाभङ्गायस्वकपोलकल्पितं पत्रमिदं भवदन्तिक आहिण्डितं स्यात् चेदनुज्ञाताः स्मोवयं तर्हि सत्यासत्यनिर्णयाय प्रतापसिंहः पत्रोत्तरेण पृच्छयते" इति। एवमस्त्विति सम्राज आज्ञामवाप्य पृथ्वीराजेन प्रतापसिंहाय दुःखितेन चेतसात्यन्तं विनिमयमयं सिसोदियाकुलशीलरक्षार्थं प्रार्थनापूर्वकं राजपूतमेदिनीस्वातन्त्र्यव्रतस्मारकं राजपूतराज्ञां दिल्लीराजधान्यां स्त्रीणां पातिव्रत्यपालनकथावर्णनात्मकं नोरोजोत्सवसमये राजसभायां देहलीनगरे महतामुपद्रवाणामुपस्मारकं पत्रं लिखितम्। 'महाराज्ञोपि नासीन्मनसि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काचना चिन्ता तादृशदलावाप्तिविषये। न वास्ति श्रीमत्तास्तादृशपत्र-प्राप्त्यै काचन सम्भावना। लिखितं स्यात् केनचिदरिणा श्रीमत्पावन-चरणानाम्। निवारयन्तु सन्देहानस्माकमनुगृह्यन्तां च सर्वे राजपूता मानधनास्तुच्छसांसारिकलाभाय च स्वीकृतयावनवृत्तयोऽक्बर राज सभामलं कुर्वाणो राजान' इति। मानसिकीमाधिमपहाय पत्रमेवंविधम-धिगम्य जागरूको बभूव भारतभूषणः सनातनधर्ममर्यादापालकः सुगृहीतनामधेयः श्रीप्रतापसिंहनृपतिः। तस्मादेव च कालात् तत्याज सर्वामौदासीन्यवृत्तिम्, कृतवांश्च सिंहनादम्। दृष्ट्वैवतत्पत्रं सरोषमभा-णीत्—किमिदं लाञ्छनमस्मदुपरि, यावज्जीवनं न कदापि कस्यचिन्प-राधीनतां स्वीकरिष्यति प्रतापसिंहः! यावन् मेवाडभूमिः स्वातन्त्र्यं न गच्छेत् तावज्जीवनं मम व्यर्थमेव। नातिचिरादेव द्रक्ष्यति अक्बरो यन्मम प्रतिज्ञा सर्वथा सत्यपथारूढा भगवत्कृपया फलं सदुदर्कोव हमवाप्स्यति—इति।

देशत्यागसंकल्पः

रीत्यानया लब्धधैर्येणापि महाराजेन शत्रुहस्तात् मेवाड़मेदिन्या मोचनोपायो नादर्शि। वनेचरैः सहाहर्निशं संमन्त्र्यापि रिपुबलं जेतु-मशक्तो हि प्रतापसिंहः सम्यग् विविच्यापि मेवाडभूमिपरित्यागमन-स्को बभूव। "क्वचिदन्यत्र स्थानं लब्ध्वा दैवानुकूल्यतया राज्यप्राप्त्य-नन्तरमपि मातृभूमिसेवाव्रतं पालयिष्यन् प्रयतमानोऽपि सर्वथा पराजितोऽस्मि महाबलैरैश्वर्यशालिभिः शत्रुभिः। राजपूतक्षत्रियास्तु ऐहिक भोगलोलुपाः सांप्रतं स्वभगिनीकन्यादिदानेन यवनराज्ञां सभायां यशोधनलाभादिभिरेव स्वात्मानं कृतकृत्यं मन्यन्ते। कथम-धुना स्वातन्त्र्यं मातृभूमेः स्यात् कथं वा जयोपलब्धिर्मविता इत्यनि-र्वाच्यातिशयपीडया पीडितहृदयो विदेशान् जगमिषुर्महाराजो मेवाड-भूमिं साष्टाङ्गं प्रणनाम। सर्वेषाञ्च वनेचराणां दोदूयमानानि मनांसि च स्वविचारधारानल ज्वालानिकरैरत्यन्तं तापयामास च॥

(सावशेषः)

———

कुलभूषणः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतोन्नतिः

(ले०—स्वामी ब्रह्मानन्दः एटा यू. पी.)

सभापते ! सभ्याश्च—अद्य श्रीमतां समक्षे संस्कृतोन्नतिः कथं स्यादित्यत्र वक्ष्ये । अस्त्याशा श्रोष्यन्ति श्रीमन्तः सावधानतया ।

प्राचीनकाले तु संस्कृतभाषायाः समुन्नतिरासीदित्येतन् निरपेक्षं वचो मम । संस्कृतसाहित्येनैव विदन्ति साक्षिणो वैदेशिका वैधर्मिकाश्च । वदन्ति च बहवो "नान्या पुरातना संस्कृतभाषामन्तरा भाषाभूदि"ति । न हि साम्प्रतमपि गीर्वाणभाषाग्रन्थसमूहवदन्यस्यां भाषायां कविता-दिकमवगम्यते । कालिदासादिभिः कवीन्द्रैर्विरचिताः शकुन्तलादिका ग्रन्थनिवहा वैदेशिकैरपि सडिण्डिमघोषं प्रशस्यन्त एव खलु ।

महामहिमशालिन्या भगवत्या भारत्यास्त्रैलोक्यपावनं प्रभावं विज्ञाय मोक्षमूलरप्रभृतयोऽपि महीयांसः प्रातःस्मरणीयं भगवन्तं वारं वारं प्रार्थयन्ते—"यद्यदि मे जन्म स्यात्तर्हि कस्यचिद्देववाणीरसिकस्य ब्राह्मणस्यैव गृहे भारतवर्षेऽस्मिन् भूयादि" ति । दाराशिको म्लेच्छो भूपतिः कश्चिद्बहूनि पुस्तकानि पठित्वाऽवगम्य च सम्यगुपनिषदः कथयाम्बभूव—"यन्मानसिकी शान्तिः केवलमुपनिषत्तत्त्वं विदित्वैव मेऽभूदि" ति । अस्तु । कथं स्यात्संस्कृतोन्नतिरिति दुरूहमेव सर्वं प्रतिभाति । पुरा तु 'मातृमान् पितृमान् आचार्यवान् पुरुषो वेदे' ति शिक्षाप्रणाली समासीत् । तत्र माताप्यधीता सती बालकमप्यध्याप-यति स्म, एवं पितापि यज्ञोपवीतादिमावश्यकं संस्कारं सम्यक् समाप्य गुरुकुले बालकं वेदादिशिक्षाग्रहणायाचार्याय समर्पयति । वेदाभ्यास-रतस्तदनन्तरं तु विहितगोदानस्य गार्हस्थ्यं यथाविधि भजते स्म । हा कष्टम्—अद्यशस्तु तद्विपरीतैव दशा सर्वथा दृश्यते—जटिलो, मुण्डो जटी वर्णी वा भवेत्यनुशासनं शास्त्रविधिविहितमपहाय चूर्णकुन्त-लालका विलोलालका बालका राजकीयामांग्लभाषां स्वैश्वर्यप्रदर्शनपुरः-सरं विषयवासनानुरूपं पठन्ति । सर्वे हि वयं विस्मृतशास्त्रमर्यादा अत एव सेवका भूत्वा धर्माचरणादिकं सर्वं विधिविहितं कर्मजातं निरस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भगवतीं देववाणीमपि न जानीमः। परम्परानुगतसंस्कारसरण्या तु जातस्य बालस्य 'ओम्' इति मधुपर्केण जिह्वायामुल्लिख्य 'वेदोऽसि ब्रह्मासि त्वम्' इति च कर्णे जपित्वा—प्रारम्भत एव पितरौ संस्कारान् स्मारयन्तौ कारयन्तौ च शास्त्रानुसारं भगवत्या भारत्याः शिक्षामेवादुः। येन सर्वे धर्मशिक्षावगमार्थं प्रधानभूतं सुरभारतीज्ञानं प्रथममेव प्राप्नुवन्ति स्म परन्तु सर्वथाद्यशस्तदन्यथैव दृग्गोचरतां गच्छति।

आसीद्धि धारानरेशे भोजे सिंहासनमलङ्कुर्वाणे भारत एवास्मिन् भारत्या महती उन्नतिः—तदानीन्तु—कियन्मात्रं जलं विप्रेति पृष्टो भोजेनानुष्टभा कश्चिद्विप्रस्तेनैव छन्दसोत्तरं—"जानुदघ्नं नराधिपे" ति व्याकरणवैशिष्ट्ययुतमदात्—काष्ठवाहं कञ्चन पश्यन् राजा तद्भारेणार्द्रहृदयः सन् तमपृच्छद्देवगिरा—भारो न बाधति किंत्वा' मिति वृत्तेनानुष्टुभा पृष्टोऽपि भारवाहकः संस्कृतभाषायां सम्यग्विहिताभ्यासो राज्ञोऽशुद्धं क्रियापदप्रयोगमाकर्ण्य चकित इव झटिति महीन्द्राय सूचनापूर्वं तमशुद्धप्रयोगं संशोधयन्वदति "भारो न बाधते राजन्! यथा बाधति 'बाधते' "—इति।

इदानीन्तु नहि कश्चिद्देववाण्यां रसिको दृश्यते न वा कश्चिद्वेदशास्त्रानुसारेण ब्रह्मचारी, गृहस्थः संन्यासी वा भवति—येन परम्परागतसंस्कारप्रभावोऽवितथमेव फलदो भवेत्—भगवत्याः सर्वभाषाजनन्याश्चादरः स्यात्। म्लेच्छराज्यात्पूर्वं तु संस्कृतपठनपाठनपरिपाटी समीचीनतया सर्वत्रासीत्। पुरुषाणां नगराणां नदीनामथर्च वस्तूनामपि निखिलानां नामानि संस्कृतमयान्येवासन्। श्रीनगर शब्दस्तु स्पष्टतया सर्वं संशयं परिहरति।

परन्तु यावनैः सर्वत आक्रान्त आर्यावर्तखंडे जम्बूद्वीपेऽप्यस्मिन् अयोध्याप्रभृतीनां विख्यातानामुत्तमानामपि देशानां नामानि फैजाबादादिशब्देषु परिवर्तितानि। हा कष्टम्! संशयमवगाहते चेतः, जायते च महती शंका हृत्तले, परीतराड्भयमिवोत्पद्यते मनसि—आवे-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शेनेव दूयते हृदयं-यत्पावनाः श्रीनगरकश्मीरादिशब्दा अपि भ्रष्टा म्लेच्छभाषायां कलेर्दुरन्तस्य दुष्टस्य प्रभावेन परिवर्तिता न स्युरित्यतः प्रार्थयामि-यदहर्निशं पत्रादिप्रचारेण मिथः साहाय्येन पाठशालाप्रचालनेन वा तत्रभवद्भिर्भवद्भिः सुरभारतीसमुन्नतये ससाहसैर्भवितव्यम्। येन मण्डनमिश्रसमय इव श्रीशंकराचार्यसदृशः कश्चिदपरिमितविद्याप्रभावः वाराणस्यां शास्त्रार्थविधानोद्देश्येनागत्य धीवरीमिव काञ्चन प्राकृतां स्त्रियं पथि पश्यन् धामनिर्णयाय-'क (मण्डनमिश्र) पण्डितस्य स्थानम्' इति पृच्छन्-तस्या एव वराक्या मुखात्—

"स्वतः प्रमाणं परतः प्रमाणं
कीराङ्गना यत्र गिरो वदन्ति।
द्वारस्थनीडान्तरसन्निरुद्धा
जानीहि तन्मण्डनमिश्रधाम" ॥

इत्येतादृशमुत्तरं सर्वस्मिन्नेव कश्मीरमंडले निखिललोकमुखाच्छ्रूयतेऽनिशम्।

———

गीर्वाण गीः

[प्रेमनाथः हण्डू रैनावाड़ीतः]

नाहं प्रखरधीः कश्चिन्न वर्यो न बहुश्रुतः।
यद्धवेदूग्राम्यभूयिष्ठं वचो मे श्रूयतां तु तत्॥

अये! संस्कृत-साहित्य-परिषदो महाशयाः सभ्याः! सांप्रतं येऽस्मिन्महीतले "कमतावलम्बिनो मनुजा लोचनगोचरतां श्रुतिगोचरतां वोपयान्ति तेषां मध्ये त एवोन्नतिभाजो दृश्यन्ते ये सर्वदा मातृभूमेर्मातृभाषायाश्चोद्धाराय बद्धकटयो भवेयुः। विद्यन्ते चेदानीन्तना बहवस्तादृशा वैदेशिका ये पामरा भूत्वापि सभ्यानामग्रेसरा एव गण्यन्ते यतो हि केवलं तेषामाशयेन मातृभूमेः परोन्नतिर्मातृभाषायाः प्रचारश्चेत्युन्नतिशिखरिशिखरं प्रापयितुं द्वयमेवालम्। निःसारा नीरसा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च तेषां भाषा कृत्रिमापि नेदानीं कृत्रिमकल्पा लक्ष्यते। पृथिवीतलस्य भूयिष्ठं भागं व्याप्य राजभाषाशब्देन व्यपदिश्यते।

आस्माकीया तु या देववाणी मुनिभिराचार्यवरैर्योगीश्वरैश्चादृता ज्ञानान्धतमसि विलीनमखिलं विश्वं ज्ञानमयेन प्रकाशयन्ती ज्योतिषा संसाररौरवयात्राकारिणामध्वनीनानां कान्तारनिवारणाय विविधानुपायान् सौकर्यावहान् करोति सैवेयमद्यशो दीनदीना सती निःशरणा वराकी कान्दिशीकेव विपद्यत—इत्यहह दुःखम्—हा किं बहुना कष्ट भो! समर्थैर्दुष्टैर्बलान्न्यकृता ह्येयं लुण्ठाकैर्लुण्ठ्यमाना नीचैरुपहस्यमाना अभिमानिभिर्मृतभाषेति कथिता ध्वंसकैरीर्ष्यापूर्वं विलुप्यमाना "उन्मीलितदृशो मा नित्यं पश्यन्त पुत्राः! कियत्कालं ममाभिभवं सोढुं समर्था भवेयुर्यूयमिति" सोपालम्भं प्रश्नवृन्दैराकुलीकरोति नः चेतांसि। एतदाकलय्यापि किं न छिद्यतेऽस्माकं हृदा किं वा न भिद्यतेऽस्माकं अहम्मन्यतया किमिव श्रावं श्रावमपि नो विदीर्यते कर्णपुटकेन? अस्या दीनामवस्थां विलोक्यापि न जाने कथमवलम्ब्यते औदासीन्यं दर्शं दर्शमपि कथं वा स्थीयते पुत्तलिकाकारैरिवास्माभिः।

अहो—यास्मत्पूर्वजनान् विवेकजलधेः पारंपरं प्रापयद्
विज्ञानादिगुणैश्चकार जगतो नित्यं हितं भारती।
यस्याः सेवनजः श्रमस्त्रि जगतां कल्याणदः संमतः
सास्माकं गरिमास्पदाभिभविता कालेन नो रक्ष्यते॥

अयि भूमंडलललामभूते भारतवर्षे प्रादुर्भूता लिपश्चिदो विदांकुर्वन्तु तत्रभवन्त साप्रतं ह्यसांप्रतमीदृशीं शोच्यामवस्थामापन्नाया गैर्वाण्या उपेक्षणम् अस्माकं निमित्तभूताया अस्याः पतितायाः सत्या अनुद्धरणेन शनैः शनैरुपाये सत्यस्माकमप्यपायोऽवश्यम्भविता—तस्मादचिरेणैव अस्याः प्रसाराय प्रतिबन्धच्छेदो विधेयो यथाशक्ति प्रारम्भिकशिक्षाकक्ष्यासु विभजनेनेति।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत रहस्यम्

(प्रथमः परिच्छेदः)

(पाठशालायां कन्यानां परस्परं संलापः)

कान्ता—(प्रेङ्खोलेषु दोलायमानां सखीमुद्दिश्य) अयि ! क्रीडाप्रिये ! किं विस्मृतं त्वया मुख्याया निरीक्षिकायाः (चीफ़ इन्सपिक्ट्रेस) परीक्षादिवसः पाठशालायाम् ?

शान्ता—(प्रेङ्खोलावारुह्य) जाने, श्वस्तयागम्यते। पीताम्बरधारिभिरस्माभिरागन्तव्यमित्याज्ञप्तं श्रीमत्या मुख्याध्यापिकया। अस्ति मम सर्वं सज्जम्। सम्पुटके लिपिपुस्तकानि हिन्दी संस्कृत भूगोलेतिहासादीनि विविधविषयाणि पुस्तकानि च धृतानि।

पुष्पा—त्वया तु हिन्दी संस्कृत विषयाणि पुस्तकान्यत्याहरणीयानि न तु आंग्लभाषामयानि। प्रियसखि ! वृथैव शान्तायाः प्रेमास्ति संस्कृतविषये। वद ! केन तत्र संस्कृतपाठाः श्रोतव्याः ? परीक्षाविधायिनी तु महोदयांग्ला, न सा सम्यक् जानाति क्षुद्रा हिन्दी-संस्कृत-प्रभृतयो भाषाः सर्वे च तस्याः प्रश्ना आधुनिकायामेव सम्मानार्हायां भाषायां सम्भवतः स्युः।

कान्ता—आम् ! सत्यम्। किमस्माभिस्तुलसीरामायण-हितोपदेशादिपुस्तकैः ? तया तु केवलं नैल्सनरीडर (आंग्लभाषा पुस्तकस्य) तृतीयं भागं चक्रवर्तेर्गणितपुस्तकं स्वास्थ्यविधिश्चाधिकृत्यैव किञ्चित् प्रष्टव्यम्।

शान्ता—(पुष्पामवलोक्य) अयि ! विप्रलब्धे ! किं मया आंग्लभाषाविषयकानि पुस्तकानि नाधीतानि ? जानामि त आंग्लभाषायां परामासक्तिम् आंग्लवस्तुषु च दृढमनुरागम्। हिन्दी संस्कृत पुस्तकानि न पठिष्यति चेत् मुख्याध्यापिकया ताडिता भवेत् हायनपरीक्षायामप्यनुत्तीर्णा स्यात्—(कान्तामुद्दिश्य) अलीकं ते कृष्णे प्रेम। कृष्णाष्टम्यां दीर्घोपवासैः स्वकीयस्थूलं वपुः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रोषितम्। रामनवम्यामपि मातुर्वचनैः प्रेरिता रामकथासु दत्तचित्तापि हिन्दी संस्कृत पाठेषूपेक्षामेव दर्शयसि।

कान्ता—सत्यं प्रिये! यत्तु शान्ता वदति पुष्पे! तदेव कुरु। यदि मम रामकृष्णयोर्भक्तिर्हिन्दूधर्मे स्नेहश्चार्यभाषाज्ञानेनैवावर्धिष्यत तर्हि सरलमधुरभाषयोरेतयोरधिका प्रीतिरप्यभविष्यत।

पुष्पा—सत्यं त्वया सरलहृदयेन वर्त्यते। मूढ़े! हिन्दू धर्मस्य कः सम्बन्धः संस्कृतविद्यया? त्वन्मते तु तातपादानां सर्वं वस्तुजातं वस्त्राणि, उपानत् (बूट) पात्राणि घटीयन्त्रादिकं च हिन्दूधर्मादपेतमेव वर्तते। न जाने एषा (शान्तामवलोक्य) जन्मान्तरब्राह्मणसंस्कारैः संसृष्टा कथमिदानीं क्षत्रियकुले उत्पन्ना। धर्मशिक्षायाः पठनसमयेऽपि वेदमन्त्रानुच्चार्यास्मत्तोधिकानङ्कान् प्राप्नोति। अतिचञ्चला बुद्धिरस्याश्चपलायाः विश्वविद्यालयीयपरीक्षायां कथमुत्तीर्णा स्यान् नैलनरीडरादि जातमनधीत्य कण्ठेऽकृत्वा वा? त्यज्यतां वार्तेयमधुना दृश्यते श्वस्तु कषायपान (चायपान) समये भ्रातरः पितृपादाः पितृव्यप्रभृतयोम्बाश्च कां मतिं दर्शयेयुरस्मिन् विषये। शीघ्रं गृहं गच्छामः। आगतो वाष्पशकटोऽपि (School lorry) प्रतिनयनायास्मान्।

द्वितीयः परिच्छेदः

महाविद्यालये पारितोषिकवितरणम्

हरितपीतरक्तवर्णपताकाभिरासीदद्य सज्जो महाविद्यालयस्य महानागारः। प्रतिष्ठिता राज्याधिकारिणः सभ्या नागरिका विश्वविद्यालयस्योपाध्यायाश्छात्राश्च सभामण्डपमलं कुर्वन् इन्दोर्दिवसे त्रिवादनसमये कृष्णपक्षस्य तृतीयस्यां तिथौ वसन्तर्तौ विशालायां नगर्यामस्याम्। आगमनानेहसि प्रधानपदवीं स्वीकर्तुर्महामंत्रिणः खान बहादुर नवाब सफदर जंगस्य, शान्ति प्राप्ते सति च सभासदां परस्परं वार्तालापरवे, महाविद्यालयस्याचार्यवरैर्वार्षिकं वृत्तं कार्यकलापस्य सर्वासां कक्षानामभापि। पंचशतसंख्याकेभ्यश्छात्रेभ्यस्त्रि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञातसंख्ययांग्लगणितक्षेत्रभूगोलेतिहासदर्शनादिविषयेषु पारितोषिकादिकमभज्यत। क्रीडाक्षेत्रेऽपि निपुणेभ्यो भिन्न भिन्न विषयानि पारितोषिकीयानि वस्तुजातान्यवातरन्। प्राज्ञविशारदशास्त्रिपरीक्षान्तेवासिनो दरिद्रक्षुद्रप्राचीन वस्त्रधारिणोऽपि यत्किंचनमात्रं पारितोषिकादिकमप्राप्नुवन्। शान्ताया भ्रातरावपि द्वौ कान्तायाश्चैको महाविद्यालयस्य छात्रा आसन् तेषां मध्ये न केनापि किञ्चिदप्य प्रापि। विसर्जितायाञ्च सभायां तेषामपि परस्परं विवादोऽभूत्।

मोहनः—त्वया तु कृष्ण ! शोभना अङ्काः प्राप्ता आसन् कथं न प्रथमो द्वितीयो वागतोऽसि ?

कृष्णः—किं न कथितं मया पूर्वमेव मृतप्राया भाषेयं संस्कृताभिधाना मामवश्यमेव गर्ते पातयेत्। पितृपादानामाग्रहेन पठितो मयायं विषयो नोचेदन्यः सुगमः कश्चित्पठितः स्याद्येनाधिका अङ्काः प्राप्ताः स्युः।

रामः—सदैव ते शङ्कैवासीत् संस्कृतभाषायाम्। मयापि पठितेयमेव सम्यक् पठितुं ज्ञातुं च शक्यते। तव तु मन एव न स्थिरं पूर्वतः। अन्येऽपि सन्ति क्षत्रिया ब्राह्मणाश्च तव कक्षायां तेषां तु नास्त्येतादृशो विचारः।

कृष्णः—केऽन्ये मया सह। सभ्यपुरुषेन न केनचिदपि गृहीतोऽयं विषयः बी० ए० श्रेण्यां तु केवलं ७ वा ८ छात्राः संस्कृतविषयस्याध्येतार अन्ये तु धौतकिरनवस्त्रधारिणः पुरोहिता गुरुपुत्राश्च शास्त्रिपरीक्षायामेव। एफ० ए० मध्ये तव श्रेण्यामपि सर्वे दरिद्रपण्डिताः ४, ५ सभ्यान् ऋते।

मोहनः—लज्जास्पदं यत् कृष्ण ! त्वमेवं विचारयसि। अस्मद्गृह एकस्मिन् दिवसे विवाद आसीदेतादृश एव। गुर्जरप्रदेशादागतेनातिथिनैकेन पितृचरणानां मित्रेण संस्कृतभाषास्वदेशवस्त्राणि भारते नवीनमतप्रचारकानामान्दोलनानि सरभसं निरन्तरं हास्यास्पदं नीतानि। तत्र तदाभूत् संवादो महान् मातृचरणानां घनिष्ठबन्धु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैकेन सह पूर्वोक्तमहाशयेन स्वदेशप्रणयिनां हिन्दीसंस्कृतहितकारिणां खद्दरादिवस्त्रधारिणां पाश्चात्यज्ञानतिरस्कारिणां वा या गती राजकीयकार्यालयेषु सभ्यजनसमाजेषु वाष्पयानस्थानेषु (रेलवे-स्टेशन) क्रीडाक्षेत्रेषु विश्वविद्यालयाधिष्ठितसंस्थासु भवति विस्तरेण वर्णितास्तस्या अम्बया बन्धोः निखिलानां चोपहासजनककथनानां समीचीनं समाधानं कृतम्।

कृष्णः—वस्त्रधारणविषये किं कथितं स्यात्? पाश्चात्यानां वस्त्राणि ह्युत्साहवर्धकानि भारतीयानां तु केवलमालस्योत्पादकानि। पश्य पाश्चात्यललनाः कथं त्वरया गत्या सर्वत्रगमनागमनक्रियासु इतस्ततोऽगक्षेपादि क्रियासु चतुरा दृश्यन्ते भारतीयास्तु बहिःपादप्रक्षेपणादिष्वपि भयमेव शङ्कन्ते।

मोहनः—असावुभयतः पाश्चात्यपूर्वीविद्यानदीपारंगत आसीत्। अस्य देशस्य सभ्यताभाषाज्ञानविज्ञानानां सम्यक् समीक्षणं कृत्वा पाश्चात्यविज्ञानविषयेष्वपि पुरुषस्यानुरागस्तु स्वयमेव तेनोपद्दिष्टः परं संस्कृतभाषाया अपूर्वं प्रेम आर्यसंस्कृतौ दृढो विश्वासः, स्वदेशीयवस्तुषु प्रणयश्च तस्य वाचा कर्मणा मनसा च सरभसमदृश्यत। अस्मिन्नेव मासे सभ्यस्य पुरुषस्य आंग्लदेशीयस्यैकस्य पत्रे प्रकाशिता स्त्रीशाटिकाशोभाविषये सम्मतिः। द्वितीयोऽपि फ्रांसदेशीयायाः पेयानोवादननिपुणाया योषिताया लेखः प्रकाशितः समाचारपत्रेषु भारतीयललनासौन्दर्याकृतिविशेषवस्त्रादिधारणविषयरूपः। द्वावपि लेखाविमौ प्रमाणीकृत्य दर्शितं तेन भारतीयललनानां स्वाभाविकं शारीरिकं सौन्दर्यं साटिकादिवस्त्रधारणेन तासां कान्तिवृद्धिश्च यान्यत्र पृथिवीतलेऽस्मिन् रमणीभिरलभ्या।

कृष्णः—तत्तु तथ्यमेव मन्ये, दृष्यापि अस्माकं नारीणामम्बराणि विदेशीयेभ्यो रमणीयानि, परं संस्कृतभाषाध्ययनं त्वतिदुष्करम्। कथितमपि विष्णुशर्मणा पंचतन्त्रप्रस्तावनायां राजसभायामेकस्यां राजपुत्राणां यत् द्वादशवर्षान् ऋते विद्यादानं न केनचिदपि पण्डि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080529

तेन उररीकृतम् । क्रियापदप्रचुरा समासबहुला महाकठिना कृते व्याकरणं दुष्प्राप्याऽतिप्राचीना प्रचलितरीतिव्यवहारशून्या अस्मादृशानां यूनामपकारिणी परीक्षासु दुरुत्तरा भाषा । किमनया ? अलमेतया ।

रामः—बाढ़म्—तातपादानामनुरोधेन त्वधीता त्वयेयं भाषा, परं न कदाचिदपि दत्तचित्तो दृश्यसे त्वमस्याम् । श्रूयते किल पाश्चात्यैस्तु बहूनां संस्कृतपुस्तकरत्नानामनुवादो विहितः । विष्णुशर्मणा रचितं पञ्चतन्त्र पुस्तकमांग्ल-फ्रांस-शर्मण्य-टर्की-रूस-प्रदेशीयैः जनैरत्यन्तं प्रेम्णाद्रियते । प्रायो विद्वद्भिः सर्वास्वेव भाषासु अनूदितं तत् पाठ्यते च कासुचित् पाठशालासु । कथितमपि तातपादैर्यत् सर्वत्र पाश्चात्य-पातालादिषु प्रदेशेषु उपनिषद्गीतयोर्महानादरः सन्मानं च क्रियते जनैः । इदानीं शर्मण्यदेशीय प्रधानेन हिटलर महाशयेन संस्कृतविद्याध्ययनं शर्मण्यच्छात्रेभ्य आवश्यकं निर्दिष्टम् ।

कृष्णः—मन्ये परं कठिना अत्र शब्दाः दुष्करा व्युत्पत्तिस्तेषां, कथं पारयितुं शक्यते । पश्य कतिपयैरेव वर्षैश्छात्रा आंग्लभाषायां कृतश्रमा दक्षा भवन्ति संस्कृतभाषा तु पंचदशभिर्वर्षैरप्यभ्यस्ता न पार्यते ।

रामः—किं विस्मृतस्तातस्यानुभवोऽस्मिंस्त्वया ? तेषां मते तु संस्कृतपाठनविधिरेव दुष्टः । महाविद्यालयानां कार्यक्रम एव सर्वः पाश्चात्यभाषाप्रभुत्वसंस्थापकः संस्कृतविरुद्धः । सर्वे विषया अस्माभिरांग्लभाषामाध्यमिकक्रमेणैवाधीयन्ते । महाविद्यालयस्य षट्पादा गृहेऽपि काचन होरा निखिलेष्वपि व्यवहारेषु प्रायश आंग्लभाषाभ्यास एव सर्वैर्याप्यन्ते । कदा त्वया संस्कृतभाषा वार्तालापादिषु प्रयोजिता ? अथको दोषो वराक्या अस्या भाषायाः ?

कृष्णः—नास्ति दोषोऽस्माकमपि तर्हि वयं तु महाविद्यालयस्य पाठ्यप्रणालीं निर्मातुमशक्ताः । यावन्मूलत एव न परिवर्तितो भवेत् संस्कृतपाठनक्रमः पुस्तकानां च विनियोगं पाठशालात एवारभ्य, यावत् संस्कृताध्यापका न परिवर्तेरन् इमां सरणिमपि तावदियमेवेतादृशी दशावश्यंभाविनी भाषाया अस्याः स्यादिति । (सावशेषः)

कुलभूषणः

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतोन्नतेरुपायाः

विश्वानि देवेति

(पं० श्रीवर भट्ट संस्कृताध्यापकः हाई स्कूल रैनावाड़ी)

अयि भोः । मान्याः सदस्याः । देववाणीरसिकैर्भवद्भिः क्षीणा छायामात्रावशिष्टा आर्य्यजनैरपि विदेशीयभाषाभिलाषिभिः साध्वीयं तिरस्कृता संस्कृतभाषा सपत्नीभूताभिः अच्छाभिरन्याभिर्भाषाभिः प्रकृतिनिर्मलापि छादति कथं पुनर्लावण्यं पुष्टिगौरवं चाप्नुयात्, इतीष्यते, यद्वशादियं संस्कृतसाहित्यपरिषदत्रभवतां महाशयानामुद्यमात्प्रतिष्ठिता । यया परिषदा विद्वन्मण्डितयाऽप्यनवलेपतयाऽस्मिन्विषये सर्वसम्मतिग्रहणं विवेचनं च कुर्वन्त्याऽहमपिस्वीयां संमतिं प्रदातुं प्रचोदितोऽस्मि । मन्मत्या हि भाषाया अस्या लावण्यं नात्यधिकेन प्रयत्नेन साध्यम् । परिषदानया सदस्यानां संख्यासंवर्धनाय यत्नो विधेयः । तैश्चसदस्यैः प्रतिमासं यथाशक्ति शुल्करूपेणावश्यं किंचिद्देयं, अन्यैश्चोपायैर्धनसचयो विधेयस्तद्यथा—दिङ्मात्रंप्रदर्श्यते, विद्यालयेषु षष्ठ्यां सप्तम्यां च श्रेण्यां संस्कृतपाठ्यपुस्तकानि योग्यानि न सन्ति, सस्मात्परिषदाऽनयोक्तश्रेणीद्वितयान्तर्गते संस्कृतपाठिनां छात्राणां कृतेयोग्यानि पुस्तकानि रचयित्वा विद्यालयाध्यक्षाणामनुमतिग्रहणाय यतितव्यम् । प्राप्तायां च संमत्यां तान्येव पुस्तकानि श्रेण्योरनयोः पाठ्यानि भविष्यन्ति । तदनन्तरं संस्कृत कोविदा निबन्धानां पुस्तकानां च निर्माणाय प्रेरयितव्याः तांच तेषां निर्मितिं पर्यालोच्य विशुद्धप्रसादादिगुणगुम्फितललित-संस्कृतलेखकेभ्यो यथायोग्यं पारितोषादिकं देयं, येन ते प्रोत्साहिता ललिततरसंस्कृतगद्यपद्यादिरचनाय प्रहुर्यतेरन् यद्वशात्संस्कृतभाषालावण्यमस्मिन्नपि काले नवीभविष्यति । पुष्टिरप्यस्या भविष्यति । प्रचारस्तस्या पूर्वकालसदृशोऽस्मिन्काले न संभवति यतो नैयमिदानीन्तनीया राजभाषा किन्तु वर्तमानप्रचारात्किंचिदधिकः प्रचारः कर्तुं शक्यः । तत्र परिषत्सदस्यानामायुष्मद्भिः स्वपुत्रैरवश्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेव पंचसुषट्सुवा विषयेषु संस्कृतविषयोऽप्येको विद्यालयेषु ग्राह्यः। स्वसुहृदो बन्धवः प्रातिवेशिकाश्च तथा प्रेरणीया यथाते स्वपुत्रान्विद्यालयेषु संस्कृतभाषां ग्राहयेयुः। प्रतिछात्रालयं तत्तत्संस्कृताध्यापकद्वारा छात्रेभ्यः षष्ठश्रेणिपाठ्यपुस्तकानि बिना मूल्यं देयानि। बिना मूल्येन पुस्तकप्राप्त्या प्रलोभिताः केचन् बालाःसंस्कृताध्ययनं स्वीकरिष्यन्ति प्रतिविद्यालयं संस्कृताध्येतृषु छात्रेषु यः कश्चित्संस्कृतविषये दक्षः स्यात्, तस्मै पारितोषको देयः। यतश्छात्रा अनुपयोगिनीयं पौरोहितीविद्येय मितिमन्यमाना नास्यां भाषायां तथाभ्यासं कुर्वन्ति यथा अन्यासु भाषासु, किंतु पारितोषकलाभाय द्विगुणमभ्यासमत्र विषयेऽपि करिष्यन्ति, संस्कृताध्यापकैश्च साधारणा कथा दशमश्रेणिविद्यार्थिभिः सहात्यन्तसरलया संस्कृतभाषया कार्या। एवं कृते सति किंचित्प्रचारस्त्वस्या भाषाया भविता। एवं च संस्कृतभाषाविद्भिः परस्परं मार्गे गृहे वा विपणौ वाऽनयैव भाषया संलापः कार्यः। श्रुतिसुखदेयं भाषा कस्य चित्ते मधुधारां न सिञ्चति, श्रवणमात्र एव बहव एतद्गुणाकृष्टा भवन्ति। गौरवस्त्वस्या न प्राक्तनकालवत् न च भोजराजादिसमयवत् कालेऽस्मिन्साधयितुं शक्यः। किंतु संस्कृतभाषाभिज्ञैः सम्यगादृता प्रचरिता च किंचिद्गौरवं प्राप्स्यतएव। दृश्यते चास्माभिर्यत्संस्कृतभाषाविदोऽपि नानया पत्रव्यवहारादिकं संभाषणादिकं च संस्कृतपठनाय परप्रेरणादिकमपि कुर्वन्ति। इयं परिषदपि सभानियमसूचनां समारम्भतिथिसूचनां विवक्षितविषयसूचनां च हिन्दीभाषयैव ददाति इति न समीचीनम्।

प्रार्थये च श्रीपरमात्मानं भाषाया अस्याः साकमार्य्यजनतया विशेषतोऽनयापरिषदा गौरवमुन्नतिं चेति भवतां भद्रमाशंसुः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्ध्या भाष्यम्

स्नान विधिः

(पूर्वतोऽनुवर्तते)

(प्र०—गोविन्द राजदान एम० ए०)

इह खलु स्वर्गादीनामपवर्गस्य च निष्पत्तये सम्यक् कर्माणि ज्योतिष्टोमादीनि आम्नातानि वेदेषु भूरिशस्तत्साधनभूतमुख्यमङ्गं स्नानमेव—तथा च श्रुतिः—"तीर्थस्नेयमिति" ॥

तच्च स्नानं षोढा नित्यनैमित्तिकभेदेन—तदुक्तं वह्निपुराणे—

नित्यं नैमित्तिकं काम्यं व्रताङ्गं मलकर्षणम् ।
क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्तितम् ॥

एतेषां लक्षणं तु तत्रैव यथा—

अस्नातश्च पुमान्नार्हो जपाग्निहवनादिषु ।
स्नातोऽधिकारी सर्वत्र दैवे पित्र्ये च कर्मणि ॥
प्रातः स्नानमतः कुर्यान्नित्यस्नानं तदेव हि ।
संक्रान्त्यादिषु यत्स्नानं नैमित्तिकमुदाहृतम् ।
पुष्यस्नानादिकं काम्यं दैवज्ञविधिस्नोदितम् ॥
यस्तुव्रतादिषु स्नानं व्रताङ्गं तत्प्रकीर्तितम् ।
मलापकर्षणं नाम स्नानमभ्यङ्गपूर्वकम् ॥
प्रातः संक्षेपतः स्नानं कर्मार्थं विहितं यदा ।
मन्त्रवद्विधिनिष्पाद्यं मध्याह्ने तत्सुविस्तरात् ॥

तथाच—स्नानं नाम मनःप्रसादजननं दुःस्वप्नविध्वंसनं
शौचस्यायतनं मलापहरणं संवर्धनं तेजसाम् ।
रूपोद्योतकरं रिपु प्रमथनं कायाग्निसन्दीपनं
नारीणां च मनोहरं श्रमहरं स्नाने दशैते गुणाः ॥

तच्च स्नानं मन्त्रादिभेदेन सप्तविधं तद्यथा—

मन्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेवच ।
वारुणं मानसं चैवं सप्तस्नायी नरो भवेत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तल्लक्षणं तु—आपोहिष्ठादिभिर्मन्त्रैर्यत्तन्मान्त्रं प्रकीर्तितम् ।
मृदा भौमं समाख्यातं पापं मे हर मृत्तिके ।
आग्नेय्यं भस्मना स्नानं मानस्तोकेति मन्त्रकैः ।
गावो यदा प्रवर्तन्ते व्रजं प्रति च वायुना ।
समुद्धूतं रजस्तत्तु वायव्यं परिकीर्तितम् ।
यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते ।
वारुणं चावगाह्यं च मानसं विष्णुचिन्तनम् ॥

तत्र— अत्यन्तमलिनः कायो नवछिद्रसमन्वितः ।
स्रवत्येव दिवारात्रौ प्रातः स्नानेन शुद्धयति ॥

तस्मात्पूर्वमेव स्नानात्—'प्रक्षाल्य हस्तौ पादौ च त्रिः पिवेदम्बु वीक्षितम्' इति कथनाद्बाह्यशुद्धिराभ्यन्तरीय शुद्धेः : पूर्वमेव, तस्मात् कर्मेन्द्रियेभ्यः प्रधान भूत कर प्रक्षालन मन्त्रः—

विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः ।
भुवनपुत्र विश्वकर्मदृष्टा विश्वकर्मेश्वर देवत्या त्रिष्टुप्छन्दस्का ।

अस्यार्थः—एकोऽद्वितीयोऽसहाय उपादानादिकारणान्तरशून्यो देव क्रीडादिशीलो बाहुभ्यां बहुस्थानीयाभ्यां धर्माधर्माभ्यां सह सन्धमति संयोजति जीवान् पुनश्च पतत्रैः पतनशीलैर नित्यैः पांचभौतिकैर्देहैः सह जीवान् संयोजयति ततश्च प्राणिनां तत्पांचभौतिक शरीरेषु कृतानां धर्माधर्माणां शुभाशुभफलहेतुभूतानां तद्भोगार्थं द्यावाभूमी कर्मफलभोगाय स्वर्गादिकं जनयति नरकादिकं च ।
स्वयं विश्वतः सर्वतः चक्षुर्नेत्राणि यस्य तथा विश्वतः परितः मुखानि यस्य एवं विश्वतो बाहवः पादाश्च यस्य सः ॥

अत्र विश्वतो बाहुरुत विश्वतस्पादिति कथनात् कर्मेन्द्रियोपलक्षणपरत्वाच्च बाह्वोः प्रथमं मलादि प्रक्षालनाय प्रक्षालनम्—न हि कश्चिदन्तरा करप्रक्षालनं पादादि कर्मेन्द्रियप्रक्षालनादिकं कर्तुमर्हः स्यात् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ पाद प्रक्षालनमन्त्रः—तत्रादौ वामपादप्रक्षालन मन्त्रः—

नमोऽस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षि शिरोरुबाहवे।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटी युगधारिणे नमः ॥

अस्य सामान्यार्थः—

अविद्यमानं देशतः कालतश्चान्तं यस्य तस्मै नमोऽस्तु, कीदृशाय सहस्रा मूर्तयो यस्य सहस्रा अनेकाः पादा यस्य तथाक्षीणि नेत्राणि शिरांसि ऊरवो बाहवः, एवं सहस्रपरिमिता नामानो यस्य पुरि पुरि सर्वप्राणिपाञ्चभौतिकदेहेषु शेते तत्तत्कर्मफलदानाय तत्तदिन्द्रियार्थोपभोगाय वा तिष्ठति यस्तस्मै शाश्वताय कूटस्थाय निर्विकाराय तथा सहस्राणि कोटिपरिमितानि सत्यादि युगानि धारयितुं शीलं यस्य तस्मै नमोऽस्तु। अस्य श्लोकस्याध्यात्मिकस्त्वर्थः—

पद्यते ज्ञायते अनेन पादो ज्ञानं बुद्धिस्तत्प्रक्षालनं विषयारागमलादिभ्यो निर्मलीकरणं स एवात्यन्तिको मोक्षः—तच्च स्वात्मसमर्पणाभिधशरणं विना न सम्पद्यते—ऽतस्तदेवाह—नमोऽस्त्विति—नमोऽस्तु सर्वात्मनः स्वात्मनः समर्पणमस्तु कस्मै कस्मैचिदनन्ताय इयत्तया विषयैरस्पृष्टाय—ननु विषया विषयिनं विना क्षणमपि स्थातुं न शक्यन्ते कथं तदानन्त्यं संघटते—इत्याशंक्याह-पुरुषसूक्तेन स्तौति—सहस्र मूर्तये सहस्रनाम्ने सर्वात्मकत्वेन सर्वान्तर्यामित्वेन स्थिताय। ननु सर्वनाशे तदन्तर्यामिनोऽपि नाशः स्यादत आह शाश्वते अच्युतस्वरूपाय तथा युगानां कोटयस्तासां सहस्रं धारयतीति कालस्वरूपायेत्यर्थः यद्वा सहस्रकोटीत्यत्यन्त संख्याकानि च तानि च युगानि प्रकृति पुरुषाख्यानि उपाधिभेदाद् धारयते—इति तदधिष्ठानभूतायेत्यर्थः ॥

अथ कथं प्रथमं वामपादप्रक्षालनमेव कथं न दक्षिणपाद प्रक्षालनं पूर्वं मित्याशंक्याह—

सावशेषः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रियनिग्रहोपदेशः

(लेखक—जैनाचार्य श्री देवचन्द्र सूरिः)

स्वेच्छा विहारसुखतो निवसन्नगाना-
मादन्वने किसलयानि मनोहराणि ।
आरोहणाङ्कुश विनोदनबन्धनाद्वै
दन्ती त्वगिन्द्रियवशः समुपैति दुःखम् ॥१॥

अन्वयः

स्वेच्छा विहार सुखतो निजवाञ्छाक्रीडानन्दतः (शैलानां) नगानां वने (विपिने) निवसन् (निवासं कुर्वन्) सन् किसलयानि (शष्पाणि) मनोहराणि (मनोज्ञानि) आरोहणाङ्कुश विनोदन बन्धनात् (आरूढाशनिविघातबन्धनात्) वै निश्चयेन दुःखं (कष्टं) समुपैति (प्राप्नोति) त्वगिन्द्रियाधीनः (स्पर्शेन्द्रियासक्तः) दन्ती (करी) ॥१॥

तिष्ठञ्जलेऽति विमले विपुले यथेच्छं
सौख्येन भीतिरहितो रममाणचित्तः ।
गृद्धो रसेषु रसनेन्द्रियतोऽतिकष्टं
निष्कारणं मरणमेति षडीक्षणोत्र ॥२॥

अन्वयः

अति विमले (अधिकस्वच्छे) विपुले (अगाधे) जले (वारिणि) यथेच्छं (यथेष्टं) तिष्ठन् (स्थितिं-कुर्वन्) सौख्येन (सुखेन) भीतिरहतः (वीतभयः) रममाणचित्तः (क्रीडासक्तः) रसेषु (मधुरलवणकटुकषायादि षड्विधेषु रसेषु) गृद्धः (अभिकाँक्षितः) रसनेन्द्रियतः (जिव्हेन्द्रियतः) अतिकष्टं (अति दुःखं) निष्कारणं (निष्प्रयोजनं) अत्र (अस्मिन्लोके) मरणं (मृत्युं) षडीक्षणः (मत्स्यः) अपि एति (लभते) ॥२॥

नानातरु प्रसव सौरभ वासिताङ्गो
घ्राणेन्द्रियेण मधुपो यमराजधिष्ण्यम् ।
गच्छत्यशुद्धमतिरत्र गतो विशक्तिं
गन्धेषु पद्मसदनं समवाप्य दीनः ॥२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्वयः

नानातरुप्रसवसौरभवासिताङ्गो (विविधवृक्षप्रसूनसुगन्ध-सुगंधिताङ्गः) अशुद्धो (अपवित्रो) मधुपः (भ्रमरः) घ्राणेन्द्रियेण (नासिकाग्रवर्त्तिना इन्द्रियेण) यमराजधिष्णयम् (परेतराट् सदनम्) गच्छति (प्राप्नोति) अत्र अस्मिन् भवे) अशुद्धमतिः (विनष्ट बुद्धिः) विशक्तिगतः (आसक्तिप्राप्तः) दीनः वराकः (दुःखदशांप्राप्तः) ॥३॥

सज्जातिपुष्पकलिकेयमितीव मत्वा
दीपार्चिषे हतमतिः शलभः पतित्वा।
रूपावलोकनमनारमणीयरूपे
मुग्धोवलोकनवशेन यमास्यमेति ॥४॥

हतमतिः (विनष्ट बुद्धिः) शलभः (पतङ्गः) दीपार्चिषं (दोपशिखां) इयं सज्जातिपुष्पकलिका इति मत्वा (अवबुध्य) रूपावलोकनमनाः (शुक्ल नीलपीतान्यतमरूपदर्शनचेताः) रमणीयरूपे (अभिरामस्वरूपे) मुग्धः (मोहंप्राप्तः) अवलोकनवशेन (दर्शनाधीनत्वेन) यमास्यं (कृतान्तमुखं) एति (अधिगच्छति)

दूर्वाङ्कराशनसमृद्धवपुः कुरङ्गः
क्रीडन् वनेषु हरिणीभिरसौ विलासैः ।
अत्यन्तगेय वरदत्तमनावराकः
श्रोत्रेन्द्रियेण समवर्त्ति मुखं प्रयाति ॥५॥

दूर्वाराङ्करानसमृद्ध वपुः (दूर्वाङ्करादनेनपीनपीवर;) कायः विलासैः (क्रीडाभिः हेतुभिः) हरिणीभिः (कुरङ्गीभिः) वनेषु (काननेषु) क्रीडन् (रममाणः) अत्यन्तगेयवरदत्तमनाः (अत्यन्त गान प्रवरनिहित चित्तः) अतएव दीनः (वराकः) कुरङ्गः (हरिणः) श्रोत्रेन्द्रियेण (कर्णन्द्रियेण) हेतुना। समवर्त्ति मुखं (यमवदनम्) प्रयाति (प्रगच्छति) ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समालोचनम्

संस्कृत साहित्य पुष्पावलिः

संस्कृतपद्य-वाणी—संस्कृतपद्यप्रधाना त्रैमासिकी संस्कृत-पत्रिका श्रीमच्छ्रीकाली पदतर्काचार्य्यसम्पादकैः श्रीगाङ्गेयनरोत्तमशास्त्रि श्री-रामकृष्णचक्रवर्त्तिविद्याभूषण एम. ए. महोदयाभ्यां सहसम्पादकभ्यां ११ चौधरीलेन श्यामबाज़ार कलिकातातः संस्कृतवाणीमहाविद्यालय-प्रतिष्ठार्थं प्रकाशितास्ति।

१३४१ बङ्गाब्दस्य प्रथमवर्षस्य वैशाखज्यैष्ठाषाढ़े प्राथमिकी-संख्यास्माकं सन्मुखे विद्यते। आकृतिः पत्रं, टाईप लेखास्तस्या अति-शोभना इति हर्षास्पदमिदम्। न केवलं पद्यप्रधाना एव लेखा किन्तु चित्रलेखा अपि मनोरञ्जका अलंकुर्वन्ति पत्रानीमानि। निबंधास्तु सुन्दरा विद्वद्भ्यः संस्कृतसहृदयेभ्यो विमलंविशुद्धंमस्तकपरिचयं ददति। मूल्यं १।।) प्रतिवर्षम्। संस्कृतप्रणयिनः काव्यप्रेमिणो विशेषतः क्रीणन्तुरिति।

शरदृतौ परिषदः कार्यम्

पण्डित नित्यानन्दाय उपसभापतये परिषदः आशिषः

सौराश्विन मासस्य ३१ तमे दिवसे ३ होरायां सभा मन्दिरे विशेषाधिवेशनं मासिकं समजनि। दुर्गाष्टमीमहानवम्योर्युगपदागतयोः पण्डितानां संख्या त्वद्य न्यूनैवासीत्। २०, २५ महानुभावानामुपस्थितौ श्रीयुत राय बहादुर दीवान विष्णुदास साहिबाः सी. आई. ई. भूतपूर्व-कश्मीरराज्यस्य प्रधानामात्याः मन्त्रिप्रस्तावेन सभासदैरनुमोदितेन सभापतिपदमलमकार्षुः। श्रीपण्डित नित्यानन्द शास्त्रिमहोदयानां परिषदुपसभापतीनां श्रीकृष्णजन्माष्टम्यां सनातनधर्मप्रतापभवने भग-वतः श्रीकृष्णस्य जन्मविषये व्याख्यानं कुर्वतामेवाकस्मात् निश्चेतनता वाक्स्तब्धताचाजायत। शरीरस्यैकस्मिन् पार्श्वे निस्तब्धता वाग्शक्तेश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निरोधः समपद्यत । हर्षास्पदं यदिदानीं सहृदयनिपुणवैद्यानां (डाक्टराणां) साहाय्येन जगदीश्वरस्यानुकम्पया च शनैः २ रोगनाशो दृश्यते । परिषदि त्वेतेषां स्वास्थ्यप्राप्तये गद्यपद्यमयीभिर्वाग्भिः सभासद्भिर्जगदीश्वरः प्रार्थितः । रैनावाटिकाप्रदेशीयेन पं० प्रेमनाथेन गद्येषु पं० गोविंदराजानकेन एम. ए. शास्त्रिणा स्वनिर्मितैः पद्यैश्च पं० नित्यानन्दशास्त्रिणो दीर्घायुषे सर्वसदस्यैरनुमोदिताः स्वहृदयाभिप्रायाः परमात्मनेऽर्पिताः ।

स्वामिब्रह्मानन्दानां व्याख्यानम्

तदनन्तरं परिषदि संस्कृतोन्नतिरूपे विषये व्याख्यानमासीत् । अतिसरल संस्कृतभाषया स्वामिब्रह्मानन्दाख्यैरेटासाध्वाश्रमनिवासिभिर्होरामात्रेण गुरुकुल प्रणाल्या विद्यायाः प्रसारो वर्णितः । भोजराजकालस्य काचन घटना अपि प्रदर्शिताः । आधुनिककालस्याङ्गलभाषा प्रचारस्यापि भारतवर्षीयानां हानिकरः प्रभावो वरिवर्ति । पत्रेऽस्मिन् स्वामिमहोदयानां लेखोऽपि प्रकाश्यते । मन्त्रिणष्टिप्पण्याः प्रधानमहानुभावस्याभिभाषणानन्तरञ्च सभा-भङ्गोजात इति ।

अष्टमो वार्षिकोत्सवः परिषदः

सौरवर्षीय मार्गशीर्षमासस्य षष्ठायां तिथौ द्वितीयेऽहनि आसीत् वार्षिकोत्सवः सभाया हिन्दुसभा मन्दिरे माइसभावाजार प्रदेशे । अहो । कीदृशोजनशून्य उत्सव इति कथनेन यदि पाठकमहाभागानां हर्षोत्कर्षे ग्लानिर्न भवेत् तर्हि सत्यं त्विदं यत् मासिकेभ्योऽप्यधिवेशनेभ्यो जनसंख्याया आसीत् न्यून एवोत्सवोऽयम् । मेघाच्छादिते शरदृतौ कश्मीरमण्डले, पिहितेषु च सर्वेषु राजकीयेषु मन्त्रिवर्याणां कार्यालयेषु, प्रस्थितेषु च कश्मीरजलवायुमण्डलाकर्षितयात्रिषु, गतेषु च व्यवहारपरायणेषु मनुजेषु जम्बूलवपुरेत्यादि देशान्, कोऽयं समयो वार्षिकोत्सव रचनाय ? बाढ़म् । अतिव्यग्रे च मयि ग्रीष्मर्तौ, न भवति यद्यपि कालः परिषदुत्सवाय तथापि यतिष्ये आगामिनि वर्षे पूर्वमेव उत्सवं कर्तुम् । अस्तु । प्रकृतमनुसरामि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हर्षास्पदं त्विदं यदद्य राजकीयमहापाठशालायाः, विशारद शास्त्री श्रेणीकैः छात्रैः बहुभिः निबंधाः कविताश्च पठिताः। तेभ्यः उत्तमतमाय निबंधाय प्रथमं पारितोषिकं ५) द्वितीयस्मै ३) छात्राणामितरेषामपि पण्डितानां कृते ५) पारितोषिकं विद्यते उत्तमतमलेखाय। लेखानां विषयास्तु अतीव मनोरञ्जकाः संस्कृत साहित्यविद्यार्थिनामाह्लादकराः। एते तु महाकविकालिदास बाणभट्टयोः श्री स्वामि शङ्कराचार्याणाञ्चसमयनिर्णयविषयकाः। यदृच्छयापि कस्मिंश्चित् विषये लेखानां कवितानां निर्माण आसीदादेशः सभायाः। २ घण्टात आरभ्य ४½ वादन पर्यन्तमभूत् सभाकार्यं, यस्मिन् ६ छात्रैः त्रिभिश्च सदस्यैर्विषयेष्वेतेषु निबंधाः पठिताः वाचा च टिप्पणी कृता। लेखास्तु योग्याः 'श्रियः' पुटेषु समये प्रकाश्यन्ते।

अद्यासीत् वर्षस्य १९९१ सौर विक्रमस्यान्तिममधिवेशनं परिषदः। हेमन्तशिशिरयोःसमासेन परिषदोऽधिवेशनं दुष्करमित्यतो चैत्र मासे अधिवेशनं स्यात्।

परिषन्मन्त्री

देवगिरः प्रसारः प्राचीनाविष्कारश्च

[ले०—पं० रघुनाथवांगनू (शालकदंल–श्रीनगर)]

श्रीरस्तुः—

"विद्या ह वै ब्राह्मणमाजगाम, गोपाय मा शेवधिष्टेहमस्मि।
असूयकायानृजवेयताय, न मा ब्रूया वीर्यवती तथा स्याम्॥"

भोः २ स्वात्मोद्धारचिकीर्षवः सदसन्नीतिनिपुणाः सभासदाः! विदितमेव तत्रभवतां भवतां श्रीमताम्; परंतु विद्वज्जनगर्हणीयाच्चित्तचापल्यात् किंचिद्वक्तुकामोस्मि, 'युक्तियुक्तमुपादेयं वचनं बालकादपी,–ति न्यायात् नाभिनिन्दनीयं हि भवद्भिः श्रीमद्भिः—यतो हि श्रीमन्तोपि ह्रीमन्तः सभायाम्; तत्र का शक्तिर्मणेः खद्योतस्य, नापि च खद्योतो स्वां प्रभामपह्नोति तारागणेभ्यः खद्युमद्भ्यः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्तु तावदयं विकल्पः, अभ्यासक्षेत्रमेव-इदं याति काश्मीरेषु विद्याचणानम्, (नहि पौराणिकी सा परीक्षाभूमिः) सैव परीक्षाभूमिः, तदेव विद्याक्षेत्रं, तदेव शिल्पागारं; येषामेव मान्यानां विद्वज्जनानां पितृपितामहादयः सर्वेषां वर्णानां मूर्धन्यभूता आसन्; तएवाधुना चाण्डालदास्यमपि वैशिष्ट्यं नेच्छन्तीत्यहो हो बुद्धिमान्द्यम्।

आसीद्धि समस्तभूमण्डले सषडंगचतुर्भिर्वेदैर्मीमांसान्यायपुराणधर्मशास्त्रादिभिरायुर्वेद धनुर्वेद गन्धर्वविद्याशास्त्रादिभि—रित्यष्टादशप्रमितिभिर्विद्याभिः सुपरिष्कृतो समस्तविदुषां समस्तगुणानां समस्तकर्मणां समस्तशिल्पानां निदानं भारतो प्रदेशः; इति नावितथोयं वादः शास्त्रीयप्रमाणैः; तथाहि—

आसन् हि यत्र विद्यावारिधयः अचर्वितचर्वणाः कश्यपमरीचिदुर्वासागस्त्यगौतमविश्वामित्रादयः प्रशस्ततमा ऋषयो-मुनयश्च, व्यासवाल्मीकिकालिदासादयः कवयः, पाणिनिकात्यायनपतञ्जल्यादयो वैयाकरणाः, कपिलकणादगौतमजैमिन्यादयः शास्त्रकाराः, नारदमनुवृहस्पतियाज्ञवल्क्यपराशरादयः स्मृतिकारा-धर्मोपदेशकाश्च, वसिष्टार्यभट्टवराहभास्कर भृग्वादयो ज्योतिर्विदः, धन्वन्तरिसुश्रुतचरकवाग्भट्टादयो वैद्याः, शंकराभिनवगुप्तवल्लभादयो धर्मप्रचारकाः, सायनोव्वटमम्मट पतञ्जल्यादयो भाष्यकाराः, अमरसिंह महेश्वरमङ्खेन्द्रचन्द्र हाशकृत्स्नापिशलिशाकटायनादयः कोषकाराः व्याकरणकाराश्च, कह्लणजोनराजप्राज्यभट्टादय इतिवृत्तलेखकाः, वीरबलादयो मंत्रिणश्चतुराश्च।

अमीभिः परिचितैर्महात्मभिः का हि न्यूनता तदासीद्भारतीयेवर्षे विद्यायाः—शिल्पस्यवाचोद्धारस्य—धर्मस्य वा ? न कापि, आसीदस्ति भविष्यति भारतवर्षोभारतोवर्षः ससरणीयगत्या, नह्यन्यत्र कुत्राप्येषां महात्मनां निवासः; नापिचान्यदेशीयः कोपिशास्त्रकार आसीत्पुरायुगे, यद्यपि चासीत्, तर्हि किं धाम किं नामा ? इति निर्णीयन्तां तत्र भवन्तः श्रीमन्तः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्त्यस्मिन्नेव सुविदिते प्रथिते भारतीवर्षे एकदेशमात्रावयवास्तपस्विजनैरविरहिता मूर्धन्यभूताः कश्मीराः, यत्र त्वेकस्यैव जैयटस्य वेदभाष्य—व्याकरणभाष्या—ऽलंकारामृतोद्गमना उव्वट—कैयट—मम्मटा आसन् हि पुत्रा त्रयः ।

नैषधचरितपरीक्षणाय काश्मीरमेव गर्वेणगच्छन्तं कस्यापि मठस्य शुद्धिलेपकारिणो नैषधचरितीयं वृत्तं गीत्या श्रावयंति स्म श्रीहर्षः; तद्भयात् विदितवैदुष्यो विदितकाश्मीरिकविद्वत्प्रथुमहिमा श्रीहर्षः स्वमेव प्रदेशं यथागतं जगाम ।

किं बहुना, अस्मिन्नेव हि प्रदेशे नव महाविश्वविद्यालयाः प्रत्येकविद्याशिल्पपरीक्षणाय नियता आसन्, म्लेच्छराज्येपि साहिबकौल—ऋषिप्रवीर—ऽनन्दराजानक—रथराजान राजानसाहिबैर—ऽध्यापकमलशाहादिभिश्च नायमपरिष्कृतो प्रदेशः, लक्ष्मीयाख्यानग्रन्थात् (नाउलीतो) मलशाहीयाख्यानाच्च सर्वोगुणः सर्वंवृत्तं च प्रादुर्भविष्यति विदुषामग्रे ।

सर्वोपि जनः सूक्ष्मात्सूक्ष्मतरार्थमेव प्रयतते—इति नीत्या शब्दग्राहका टेलिफोनादयस्तेषां विद्वद्वराणां हीनतमा आविष्काराः, "इत्यहं वासुदेवस्य, पार्थस्य च महात्मनः । संवादमिममऽश्रौषमऽद्भुतं रोमहर्षणम् ॥ व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परम् । योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम् ॥" इत्यनेन प्रमाणेन हीनतमपदप्रमाणाय भारतीययुद्धोपदेशका राजमहले स्थितः संजयस्त्वत्रविषये प्रमाणम्, भवन्तामेतदप्यऽपरिचितं न स्यात्, यत् शब्दग्राहिणीतन्त्री व्यवहारमत्रत्याः बालकाः खेलनाय कुर्वन्तिस्म, यदि च भवन्तोऽविश्वासास्पदतामावहन्ति, तर्हि भवत्समक्षमेव सर्वं प्रकटीभविष्यति, पार्वताधित्यकोपत्यकास्थितयोर्वार्ताव्यवहारः कथं भवति—इत्यपि च स्वबुद्धिपथं नयन्तु तत्र भवन्तः श्रीमन्तः, ननु किं विद्युज्ज्ञानं नासीत्तेषाम् ? तर्हि कथं भवन्त अद्यापि विद्युद्गर्जने विशेषेण कांस्यापात्रान् वस्त्राच्छादनेन प्रच्छादयन्ति, पिपठिषोस्तुर्कीयाफलातूनपुत्रस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वंगदेशे यवनवृत्तान्तदर्शनेन सर्वमगोचरं भवेत्; अथवा प्रत्यक्षानुमानमेव तेषामासीत्, नामुष्मिकम्, आमुष्मिकमप्याऽसीद्दुष्पारं पारम्; तथा हि—

"ब्रह्मचर्यं प्रतिष्ठायां वीर्यं लाभः" इति सूत्रदर्शनात् सत्पथ्य सेवकानां ब्रह्मचर्याणां योगिनां कुतो रोगोत्पत्तिः, अद्यतः पञ्चाशत्प्रमितिवर्षप्रथमं किमीदृशी रोगोत्पत्तिरासीत्कश्मीरेषु ? नहि नहि ब्रह्मचर्यं सेवमानस्य योगिनः कदापि रोगाः प्रादुर्भवन्ति; स तु स्वयमेव कालकालो भवति शास्त्रेषु दर्शनात्।

"परिणामत्रयसंयमादतीतानागत ज्ञानम्, शब्दार्थ प्रत्ययानामितरेतराध्यासात्संकरस्तत्परविभागसंयमात्— सर्वभूतरुतज्ञानम्, संस्कार साक्षात्करणात्—पूर्वजातिज्ञानम्, प्रत्ययस्य परचित्तज्ञानम्, बलेषु हस्तिबलादीनि, भुवनज्ञानं सूर्ये संयमात्, चन्द्रे ताराव्यूहज्ञानम्, ध्रुवे तद्गतिज्ञानम्, नाभिचक्रे कायव्यूहज्ञानम्, कण्ठकूपे क्षुत्पिपासा निवृत्तिः, कूर्मनाड्यां स्थैर्यम्, मूर्द्धज्योतिषि सिद्धदर्शनम्, प्रतिभाद्वा सर्वम् हृदये चित्तसंवित्, पुरुषज्ञाने काल कालता" इति स्मरणाच्च ज्ञायते किमपि दुष्करमविदितं वा नासीत्पूर्वजानाम्।

आथर्वणोपनिषद्याथर्वणिकाः समामनन्त्येवम्—

"अथ यस्य जायामार्तवं विन्देत्त्र्यहं कंसेन पिवेदहतवासा नैनां वृषलो न वृषल्युपहन्यात्त्रिरात्रान्त आप्लुत्य व्रीहीनवघातयेत्।

स य इच्छेत्पुत्रो मे शुक्लो जायेत वेदमनुब्रवीत सर्वमायुरियादिति क्षीरौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै।

अथ य इच्छेत्पुत्रो मे कपिलः पिङ्गलो जायेत द्वौ वेदावनुब्रुवीत सर्वमायुरियादिति दध्योदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै।

अथ य इच्छेत्पुत्रो मे श्यामो लोहिताक्षो जायेत त्रीन्वेदाननुब्रवीत सर्वमायुरियादित्युदौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयित वै।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ य इच्छेद्दुहिता मे पण्डिता जायेत सर्वमायुरियादिति तिलौदनं सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ।

आधुनिके तु समये कोऽप्येतादृशो वैद्यः न दरीदृश्यते, यः पुंव्यक्तिं वा स्त्रीव्यक्तिं कर्तुं शक्नुयाद्गर्भस्य ।

अधुना भगिनी कन्या श्रीमती देवी स्वयमेव निर्णेतुं शक्या, किमीदृश्युन्नतिरासीत्पुराकल्पेऽपि वा न ? वैद्यवैदग्ध्यता (डाक्टरी) याति पुराकल्पे वा बृद्धिमती—इति स्वत एव सर्वमनः सु समुदेति नाम ।

यद्यपि च प्रथमं नासन् समयानुरोधेन विच्छेदिता टेलिफोनादयः पदार्थाः; तर्हि कथमेषामुद्भवः ? 'नासतो विद्यते भावो नाभावो विद्यते सतः, इति दर्शनात्, शब्दग्राहकत्वमाकाशस्येति किमुन्मत्तगीतमेव नैयायकादीनां तत्तद्गुणज्ञानाम् ? विज्ञायते ह्येतस्मात् प्रथममप्यासन्नवश्यमेव टेलिफोनादयः पदार्थाः; परं च ईश्वरनियतिशक्तिवशात् समय परिवर्तनमपि भवितव्यमेव, नहि कस्यापि पितृपैतामही नियतिरनुवृत्ता भवति, सत्यं चोक्तं नीतिविद्भिः—

"प्रतिकूलतामुपगते हि विधौ, विफलत्वमेति बहु साधनता ।
अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः कर सहस्रमपि ॥"

कामक्रोधलोभमोहद्वेषादिभिर्विनष्टे धर्मे बुद्धिकोषे च म्लेच्छराज्यप्राबल्यतया नष्टप्राये सर्वसंग्रहे समयानुरोधेन च विनष्टेबुद्धितत्त्वे विद्वज्जने च ईदृशी वर्तमान कालिकावस्था संजाता; परं तु प्रशंसनीयाश्च तेऽस्मन् मान्या धन्या महात्मानः; यैश्चैऽतादृशे कष्टतरे म्लेच्छीयसमयेऽपि साधुतरमेव समयो व्यतीतः, एतस्मिन्विषये परीमहलस्थस्य महात्मनः श्रीमतः साधो राजान वर्यस्य वृत्तं प्रशंसनीयतरमवश्यमेवावलोकनीयम् ।

(सावशेषः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत वाङ्मयः संसारः

(पेशावर)

श्रीयुत सुगढ़चंदाभिधानमहाशयः परशुपुर प्रदेशात् 'श्रियः' प्रेमप्रदर्शनानन्तरं संस्कृतभाषायां स्वोन्नत्यै भारते संस्कृत पत्राणां ऋते 'श्रीं' परिचयं वाञ्छति ! महानुभावोऽयं वर्षात् पूर्वं प्रतिद्वयं 'श्रियः' गृह्णाति। एका स्वार्थे द्वितीयान्यस्मै कस्मैचिदुपहारार्थे। यद्यस्माभि व्यक्तिरूपमप्युत्तरं प्रहितमासीत् महाशयाय, तथाप्यन्येषां सूचनार्थं निम्नलिखितमति संक्षिप्तं वृत्तं भारतवर्षीयानां संस्कृत पत्राणां दीयते श्रियः पाठकानां ज्ञानविनोदाय च।

बनारस नगरतः (काशीतः)

'सूर्योदयः' जगतगंजतःकाश्यां रूप्यकद्वयं प्रेषयित्वा प्राप्तुं शक्यते। सरल संस्कृत भाषायां अखिल भारतधर्म महामण्डलस्य मुखपत्रं सनातन धर्म प्रचाराय विद्यार्थिनां कृते परीक्षेत्यादि विषयाणां धर्म-ग्रन्थानाञ्च परिचयदानाय, शोभनं मासिकं पत्रमिदम्।

'सुप्रभातम्' सुप्रभात कार्यालयात् काश्यां चैत्रपूर्णिमामारभ्य प्रचलति पाक्षिकं पत्रमिदम्। सुप्रभातपत्रस्योद्यमशीला विद्वांसः सम्पादकाः पं० केदारनाथशर्माणः संस्कृतसाहित्यसेवायामग्रेसराः सन्ति। कतिपयमासेभ्यः पत्रं तु तेषां नागच्छति विनिमयरूपेनास्मद भ्यर्णे। आशासे पत्रं सुगुप्तं स्यात्। पत्रस्यवृद्धिं कामये। प्राकाश्यते चेत् तर्हि 'श्रियः' विनिमयरूपां प्रति प्रेषयन्तु सम्पादकमहोदयाः त्वरितं प्रूफ़ संशोधनकाले प्राप्तंभाद्रपदमासीयं पत्रमपि। ज्यैष्ठमासान्न प्राप्ता प्रतिरस्य।

जयपुरात् (राजपूतानातः)

'संस्कृतरत्नाकरः' अखिल भारतवर्षीयसंस्कृतसाहित्यसम्मेल-नस्य मुखपत्रमतिसुन्दर मनोहरसंस्कृतभाषायां निस्सरतिवर्षाभ्यामि-दानीम्। प्रतिमासं मनोरञ्जक लेखैः भूषितमिदं पत्रं भट्ट श्रीमथुरानाथ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साहित्याचार्याणां सम्पादकत्वेन प्रकाश्यते। केवलं मासत्रिरेणागच्छति महानुभावानामेतेषां यतो अक्तूबर मासे अगस्तस्य पत्रं तु सितम्बर मासे जौलाई मासस्य भवति। आशासे यत् प्रतिमासे यथासमये पत्र-प्रकाशने उद्योगं कुर्वीरन् सम्पादकमहाशयाः।

कलिकात (कलकत्तादेशतः)

शयामबाज़ार कलिकातास्तः 'संस्कृत साहित्य परिषत् पत्रिका' दशवर्षेभ्यः निर्गच्छति। शोभना गद्यपद्यमया लेखा अलंकुर्वन्ति पत्रिकामिमाम् प्रतिमासम्। सुन्दराक्षिप्ताकृतिश्च पत्रस्य। बंगदेशीयनां विदुषां महत्वपूर्वका लेखा कविताश्च आङ्गलपुस्तकानां प्रसिद्ध नाटकादिनामभिप्रायस्य वर्णनञ्च दरीदृश्यते। पूर्वं चिरेणेदानीं तु समय एव प्रकाशिता भवति पत्रिकेयम्।

'पद्यवाणी' शयामबाज़ार ११ चौधरीलेनतः त्रैमासिकीपत्रिकेयं नवीनैव निर्गता। अन्यस्मिन् स्थाने किञ्चिद् विस्तरेण परिचायितास्ति पत्रिकेयं 'श्रियः' अस्मिन्नेवाङ्के।

महिसूर (राज्यतः)

'श्रीमन्ममहाराज संस्कृतमहापाठशालायाः' त्रैमासकीयं पत्रिका निस्सरति श्रुतिस्मृति वेदान्तदर्शनविषयकैर्लेखैः संयुक्ता, महाविद्वत्तानुगता अनुसन्धानशीलानां सम्पादकसमितेः सदस्यानां शुभविचारैः पोषिता। जनवरी मासादनन्तरमस्मद् विनिमयरूपा प्रति त्वस्या न प्राप्ता आशासे सर्वथा कुशलं पत्रस्यास्य विद्यते।

संस्कृत पत्राणां जीवनं प्रायशोऽतिस्वल्पं भवति। शोकस्थानं यतो बहूनि प्रादुर्भूतान्येव म्रियन्ते ह्यन्यानि किञ्चिद् कालं विहाय लोकोत्साहाभावेनापवर्गं प्राप्नुवन्ति।

भू

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत साहित्य परिषदः श्रीनगरस्य

श्रियश्च नियमाः

उद्देश्यः—

परिषदोऽस्याः केवलमेकएवउद्देश्यः—संस्कृतभाषार्यसभ्यता रक्षार्थं प्रचारः।

नियमः—

सभासदास्तु न्यूनान्न्यूनं आणकानां चतुर्णां प्रतिवर्षं दानेन सर्वे भवितुमर्हन्ति उपरिनिर्दिष्टमुद्देश्यमुररीकृत्य।

'श्रीः' पत्रिका

एतत् प्राप्त्यर्थं १।) श्रीनगरात् भिन्ननगरस्थेभ्यः।१) श्रीनगर-स्थेभ्यश्च शुल्करूपेण धनमपेक्ष्यते। अनेनैव पत्रिकापि लभेत सभासत्त्वमपि च भवेत्।

सहायता

परिषदो व्ययः पत्रिकाया अस्याः कृते शुल्कादत्यधिकं भवति, यदि शुल्कं सर्वेभ्योऽपि आगच्छेत्। परन्तु धनाभावात् बहवः संस्कृतज्ञाः छात्राः ब्राह्मणाश्च विनामूल्येनैव लभन्ते पत्रम्। अतः सहायतारूपेण किञ्चिद् धनमस्यै अवश्यमेव संस्कृतो-द्धारप्रणयिभिर्दातव्यम्।

पत्रप्रकाशनसमयः

त्रैमासिकं पत्रमिदं सौरवर्षस्य चैत्र, आषाढ़, आश्विन, पौष, मासेषु निर्गच्छति। पत्रप्रकाशनमासानन्तरमपि पत्रस्या-नुपलब्धौ सूचनाप्रेषणेन पुनरपि प्रेषयिष्यते पत्रम्। मासा-दनन्तरं तु पत्रं न प्राप्यते।

पत्रव्यवहारः

लेखप्रेषणाय पत्रप्रबंधाय च निम्नाङ्कितेन प्रत्ययेन पत्रव्यवहारो विधेयः

कुलभूषणः

परिषन्मन्त्री

श्रियः सञ्चालकः स. सम्पादकश्च

सुन्दार बाग़, श्रीनगर, (कश्मीर)

भीमसेन विद्यालङ्कार के प्रबन्ध से

'नवयुग प्रिंटिंग प्रैस', १७, मोहनलाल रोड, लाहौर में मुद्रित।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्ष ३ | Vol. 3
संख्या ४ | Number 4

ओ३म्

कश्मीर प्रदेशस्थ श्रीनगरस्थायाः

संस्कृत साहित्य परिषदः

त्रैमासिकं पत्रम्

'श्रीः'

Quarterly Journal of the

SANSKRIT SAHITYA PARISHAD

SRINAGAR, KASHMIR.

श्रीनगर चैत्र १९९१

Srinagar April 1935

सम्पादकौ

पं० नित्यानन्दः शास्त्री   पं० कुलभूषणः

वार्षिकं मूल्यम् १)

प्राप्ति स्थानम्—पं० कुलभूषणः सुल्तारबाग श्रीनगर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषय-सूची

लेखानामुत्तरदायिनौ न सम्पादकौ। सर्वेषां लेखाः तेषामेव भाषया तन्मतानुसारेणैव प्रकाश्यन्ते।

विषयः	लेखकः	पृष्ठः
(१) वेदेषु देवता वर्णनम्।	पं० बुद्धदेवो विद्यालङ्कारः	१–६
(२) परीक्षा-गुणदोष विमर्शः।	पं० दीनानाथ शर्मा शास्त्री सारस्वतः मुलतान	७–१२
(३) धर्ममीमांसा।	स्वा० धर्मदेवः सिद्धान्तालंकार बंगलोर	१२–१६
(४) भारतभूषणो महाराणाप्रतापः।	पं० कुलभूषणः	१६–१९
(५) देवगिरः प्रसारः।	श्री० पं० रघुनाथ वांगन् शालाकदन	२०–२४
(६) संस्कृत-रहस्यम्।	पं० कुलभूषणः	२४–२९
(७) शाब्दिकतत्त्वम्।	पं० शिवनाथ शास्त्री साहित्यभूषणः साहित्यमणिः	२८–३१
(८) कन्या-विवाहसमर्थनम्।	श्री० स्वामी कृष्णाचार्य	३१–३८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीः

वर्ष ३ | चैत्र संवत् १९९१ वि० तदनुसार अप्रैल १९३५ | पूर्ण संख्या १२ संख्या ४

वेदेषु देवता वर्णनम्

(ले—पं० बुद्धदेवो विद्यालङ्कारः)

ननु भोः को नाम न वेद आर्यकुले लब्धजन्मा यदस्माकं सकलस्यैवैहिकामुष्मिकस्य व्यवहारस्य बोधनाय वेदा एव परमं प्रमाणमिति। तदेतेषां सकलविद्वज्जनचक्षुर्भूतानां प्रमाणग्रन्थेषु पट्टाभिषिक्तानां वेदानां यथावदर्थबोधाय तद्विरोधिनामपि न निष्प्रयोजनः प्रयासः। किम्पुनस्तत्र परमपुरुषस्य निःश्वसितमिति श्रद्धानुबन्धानाम्। परं वैदिकानामार्याणामर्थनिर्णयकाले तेषु तेषु सूक्तेषु शिखरस्थाने सन्निबद्धानामृषीणां छन्दसां देवतानामपि च परमार्थतो ज्ञानमूलत्वमपरिहेयमिवेत्याहुः संप्रदायविदः। तत्रापि ऋषीणां छन्दसश्च ज्ञानं न तदर्थावबोधे साक्षादुपकारकमिति कामं केचित्तत्रोपेक्षामावहेयुः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परं देवतानां निर्णयस्तु मन्त्रार्थनिर्णये साक्षादुपकारकत्वान्न कस्यापि प्रेक्षावत उपेक्षां सहेतेति कस्य नाम तिरोहितं स्यात् ।

तस्मादस्मिन्नेव देवतातत्त्वनिर्णये स्वमतं स्वाशयञ्च यथामति विवरीतुकामो विप्रतिपन्नानामपि विद्यावयोवृद्धानामाशिषामर्जने प्रभवेयमिति सविश्रम्भमाशासे ध्रुवमेव च 'श्री' पत्रिकायाः पाठकमहाभागानां पुरस्तादस्य प्रबन्धकस्योपायनीकरणे हेतुः ।

तत्र पूर्वमिदं विस्फोटनीयं यद्देवताशब्देन वैदिके वाङ्मये पौराणिकेषूपाख्यानेषु देवपदेनाभिहितानामिन्द्रवरुणयमगणपत्यादीनां ग्रहणमिति मा कैश्चिदपि भ्राम्येत निषङ्ग तूणीरादीनामायुधोपकरणानां, श्रद्धा, गर्भस्रावे प्रायश्चित्तं इत्यादीनां भावनामपि च देवतात्वेन परिगणितत्वात् तस्माद्यत्र सूक्ते मंत्रे वा यस्य भावस्य स्तवनमुपवर्णनं वा स एव तस्य सूक्तस्य सूक्तैकदेशस्य वा देवतेति सकलसम्प्रदायविदभिमतः सिद्धान्तः । न चात्र किञ्चिदपूर्वमुपन्यस्तमस्माभिर्न च तिरोहितमिदं कस्यचिद्वैदिके वाङ्मये लब्धप्रवेशमात्रस्यापि जनस्य । परं केचित्काव्यव्याकरणादिमात्रालोचनपरा वैदिकसाहित्यालोचनपराङ्मुखानामत्र भ्रान्तेः शरण्यतामुपगच्छेयुरिति यदृच्छोपात्तोऽयं विषयः समुपवर्णितः । एतदुपवर्णयंश्च न तद्विदां कोपभाजनतां गमिष्यामीति दृढमाशासे ।

अथैतासामत्र वर्णनीयविषयापरपर्य्यायभूतानां वैदिकीनां देवतानां कुतोऽधिगम इति मीमांस्यतामधिरोहति । किं यथानादिनिधनाया भगवत्या निगमवाचः परमपुरुषात् प्रतिकल्पं यथापूर्वमाविर्भावस्तथैवैष देवतावर्गोऽप्यनादिसम्प्रदायलब्धो यद्वा वेदार्थावगाहने प्रवृत्तानां महामतीनां प्रज्ञोपज्ञातस्तदत्र निर्णयाय स्थालीपुलाकन्यायेन याजुषीनां देवतानां विषये तत्र भवतामुव्वटमिश्राणामुक्तिमुपहरामः । तत्र शुक्लयजुषां भाष्योपक्रमे स्वमतमित्थमाविष्कुर्वन्नुव्वटाचार्यः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुतस्तर्कतश्चैव तथा शातपथश्रुतेः ।

ऋषीन् वक्ष्यामि मंत्रणां देवताश्छान्दसश्च यत् ॥

तत्रेदं विमृश्यते यन्न वयं शतपथ ब्राह्मणे क्वापि मंत्रस्यास्येयन्देवतेति स्फुटं नामनिर्देशपूर्वकं देवतोल्लेखमुपलभामहे । त "च्छातपथ श्रुतेः" देवताधिगम इति प्रतिजानानस्य किं भाष्यकर्तुर्हृदयम् ? तत्र विनियोगावलम्बनेन यो मंत्रो यत्र कर्मणि विनियुक्तस्तत्प्रधानाङ्गभूतं पदार्थन्तन्मन्त्रदेवतात्वेनाध्यवस्यात भाष्यकृदित्येवाकूतमुन्नीयते— तस्माच्छातपथश्रुतेर्लब्धदेवताधिगमोऽपि वस्तुतस्तर्कमूल एव ।

अथेदानीं गुरुतो देवताधिगमं विमर्शपथमवतारयामः । तत्रापि यदि गुरुणानादिसंप्रदायलब्धं देवतानां यथातथ्यं तत्किंप्रयोजनं तर्कशातपथयोरुपासनस्य तस्माद्गुरुत इत्यस्यापि गुरुकृततर्कबलादित्येवाशय इत्यध्यवसेयम् ।

तदित्थं न देवतावर्गोऽयमनादि संप्रदायलब्धोऽपितु तैस्तैर्भाष्यकृद्भिः स्वतर्कबलायथामतिरुन्नीतः । तेभ्यो भाष्येभ्यः कैश्चित् पृथगपि समाहृत्योपनिबद्ध-इत्येव निष्कर्षः ।

अमंत्रितव्यतिकरे यदि कश्चिदद्यतनीनो भाष्यकृत् स्वतर्क बलात् पूर्वेषां भाष्यकृतां देवतानिर्णयमपाकरोति ततस्तन्मतस्य याथातथ्यं तर्कबलादेव निर्णेतुं शक्यते न शब्दबलादिति निश्चीयते ।

इत्थञ्च यजुषां भाष्यकाले प्रथममंत्रस्योव्वटमहीधरादीनां मतमनादृत्य लोकोत्तरप्रतिभेनान्धतामिस्रनिमज्जन्निगमवाङ्मयैकसमुद्धारकेणैतद्युगाधिपतिना यतीश्वरेण न शाखादेवताऽपितु सविता देवतेति यन्मतमाविष्कृतं तद्यदि सम्यक् तर्कानुबद्धं ततो न तत्र किमपि स्थानमकाण्डताण्डवस्येति प्रतिजानीमहे तर्कबलाबलनिरूपणाय चेममेव मंत्रं निदर्शनपदवीमारोप्य क्षणमत्रैव विचारपरम्परां तनुमः ।

अत्र शाखादेवतेति वादिन इत्थमाहुर्यच्छतपथ ब्राह्मणे इषेत्वेतिशाखामाच्छिनत्तीत्युक्तं तदत्र पलाशशाखाछेदने विनियोगादस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मंत्रैकदेशस्य शाखादेवतेति । इदन्त्विहानुयोक्तव्योवादिपुंगवोऽयम्—ननु भोः गोधूमचूर्णमुष्टिं भिक्षाशरावे निक्षिप्य अन्नायत्वेति दातारमुपयाचमानो भिक्षुजनः किमन्नमभिमुखीकरोति दातारं वा। तथैव शतपथब्राह्मणेऽपि—'इषेत्वे' ति शाखामाच्छिनत्ति—'इषे वृष्ट्यै तदाहेति' आचक्षाणया भगवत्या ब्राह्मण—वाचा स्वयमेवाविष्कृतं स्वहृदयम्। कार्यकारणयोरभेदेन वृष्टिजग्धसस्ये सम्यगुपलक्षणे भूतां शाखांहस्ते समादाय भगवन्तं परमपुरुषं याचमानो यजमानो न शाखामभिमुखीकरोत्यपितु शाखास्रष्टारमिति कस्य नाम प्रेक्षावतस्तिरोहितम्। तद् यं शाखासम्पदायं शरण्यत्वेनाभिमुखीकरोति स देवताभिधेयताङ्गच्छेत् पलाशशाखा वा।

सच शरण्यभूतोऽत्र देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण इत्यभीष्टसंपत्प्रापकत्वेन स्पुटमेव देव इति श्रुत्या विशिष्यमाणः सविताऽत्र देवता स्यात् पलाशशाखा वेति सदसद्विवेकैकनिकषाविदः सुधिय एवात्र प्रमाणम्।

अथेदानीं स्वाशयं निदर्शनोक्त्योन्मीलयितुं ऋग्वेदान्मरुद्देवता विषयकं सूक्ष्मजातं मरुद्देवतातत्वनिर्णयाधारभूतमभ्युपगम्य स्वपद्धत्यनुसारेण यथाक्रमं तद्विशेषणानि उपाहरामि। ऋग्वेदे नवत्रिंशत् सूक्तानि मरुतां स्तुतिपराणि। तत्रेदं निर्णेतव्यं क एते मरुतो नामेति।

तत्र प्रथमे मंडले	३५	सूक्ते	३ मंत्रे
	३७	,,	६ ,,
	६४	,,	४–१०
	८५	,,	८
द्वितीय मंडले	११६	,,	१३
	३६	,,	२
पंचमे मंडले	५२	,,	६–६–११
	५४	,,	३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

	५७	,,	८
	५६	,,	२, ३, ५
	६१	,,	१
षष्ठे मंडले	४६	,,	११
सप्तमे मंडले	५६	,,	६
अष्टमे मंडले	२०	,,	६-७

अष्टादशसु स्थानेष्वेते नर इत्युच्यन्ते। ननु योगाद्द रूढिर्बलीयसीति स्वाभिमतं वादमेव स्वमतविनाशाय समुद्यतमभिलक्ष्य प्रयोजनवशाद् वादी नरो नेतार इति व्युत्पत्तिलभ्यमेवार्थमवलम्बनीकुर्यादिति चेन्न तदपि तस्य क्षेमङ्करम्।

प्रथम मंडले	६४ सूक्त		२ मंत्रे
पंचम ,,	५३	,,	३
	५६	,,	६
	५६	,,	१

चतुर्षु स्थलेषु स्फुटमेव श्रुत्या मरुतो मर्त्या मर्तास इति विशेषणाभ्यां व्यवच्छेदनात्। तदेते मरुतो न वायवो नापि तदधिष्ठातृ देवतारूपेण कल्पिता देवजातिविशेषा वा केचनापितु मनुष्या एव मरणधर्माण इति सुव्यवस्थितम्।

अथेदानीं कीदृशा एते मनुष्या इत्यनुयोगे श्रुतिरेवाह "गणश्रियइति" न तेषां कापि स्वकीया श्रीरपितु सर्वापि श्रीस्तः स्वस्मै गणायैव समर्प्यते तस्मादेते गणश्रिय उच्यन्ते।

अथ गणनामधेये कस्मै प्रयोजनाय समुदितोऽयंगण इति मीमांसायां पुनराह भगवती वेदवाणी।

नि यो यामाय मानुषो दध्र उग्राय मृत्यवे जिहीत पर्वतो गिरिः।

ऋग्० १। ३७। १

उग्रेण मन्युना क्रिमेते कुर्वन्तीत्याकांक्षायाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थिरा वः सन्त्वायुधा पराणुदे वीळू उत प्रतिष्कभे ।
युष्माकमस्तु तविषी पनीयसी मा मर्त्यस्य मायिनः ॥
ऋग्० १ । ३९ । २

अथैषां वेषभूषादिकमपि

वाशीमन्त ऋष्टिमन्तो मनीषिणः सुधन्वान इषुमन्तो निषङ्गिणः ।
स्वश्वाः स्थ सुरथाः पृश्निमातरः स्वायुधा मरुतो याथना शुभम्

अथैषां वेषसादृश्यमपि

यमा इव सुसदृशः सुपेशसः

अथ श्रेणी बन्धोऽपि

वयो न ये श्रेणीः पप्तुः ५ । ५९ । ७

अनेन गणोपासनेन गणार्थमात्मार्पणेन मन्युना चोग्रेण ऋष्टि धनुर्निषंगरथाश्वसम्भार सम्पत्त्या च वेशसादृश्येन श्रेणीबन्धेन च मर्त्यत्वेन च यद्येषां सैनिकत्वं न सुनिरूपितं तत्कोऽन्यः पन्था याथातथ्य निर्णयायेति प्रेक्षावन्त एव व्यवस्थापयन्तु । प्रथमं केचिन्मनुष्यवद्देवताभिधानानि भवन्तीति यास्कोक्तिमवलम्ब्यात्र मनुष्या अपिवायुभूता मरुतोऽत्र मनुष्यवदुपहृता इत्याहुः तत्तु न समञ्जसम् । मनुष्यवद्देवताभिधानानि भवन्तीति यास्कवचनं तु ओषधयः समग्मत राजानः समिताविवेत्यादिवाक्येषु यत्रोषध्यादिषु स्फुटमेवश्रुत्या मनुष्यभिन्नद्रव्यत्वेनोपजातेषु पदार्थेषु यत्र संवादादिमनुष्यधर्मारोपस्तत्तद्वाक्य परत्वेन नेतव्यम् । तदित्थं विशेषणबलेन देवतानां याथातथ्यनिर्णये जाते वेदार्थोऽपि सुगमः स्यादिति निश्चिनुमः ।

इत्थमिन्द्रवरुण मरुदादयो मनुष्यविशेषाश्चेत् कथमत्र मंत्रेषु आध्यात्मिक तत्वनिरूपणं , कथञ्च वेदानामनन्त विद्या निधानत्व मिति चेत्तत्त विस्तरभयान्नात्र लिख्यते तल्लेखान्तरे प्रतिपादयिष्यामः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"परीक्षागुणदोषविमर्श लेखस्य"

शुद्धाशुद्धि-पत्रम्

अस्मिन्नङ्के (३।४) ७ पृष्ठ ४ पंक्ति 'उत्तीर्णातायाः' अत्र 'उत्तीर्णतायाः' इति स्यात्। १४ पं० 'तत्रापेक्षन्ते' अत्र 'तत्रोपेक्षन्ते' इति स्यात्। १६ पङ्क्तौ 'परीक्षकानाम्' अत्र 'परीक्षकाणाम्' इति णकारो ज्ञेयः, एवम् २४ पङ्क्तौ 'गतवर्षीयानि' अत्राऽपि 'गतवर्षीयाणि' इति णकारो ज्ञेयः। १८ पं० 'तद' इति हलन्तः स्यात्। २६ पङ्क्तौ 'पृष्टव्यानाम्' इति महान् प्रमादो दृश्यते; तत्र 'प्रष्टव्यानाम्' इति सरेफपाठः स्यात्। अस्यैव पृष्ठस्य १३ पङ्क्तौ 'अवबोधयिषेयुः' अत्र 'अवबुबोधयिषेयुः' इति 'बु' युक्तपाठः स्यात्। २१ पं० 'आपाततः' इति पाठो ज्ञेयः।

८ पृष्ठे—'स्नरन्ति' 'पृच्छन्ति' 'स्वास्थ' अत्र क्रमशः 'स्मरन्ति' 'पृच्छन्ति' 'स्वास्थ्य' इति पाठो ज्ञेयः। ९ पृ० २ पं० 'तेनेमः' अत्र 'तेनेमाः' इति स्यात्। १० पं० अत्र 'उपजिह्विका' इति पकारपाठो ज्ञेयः। २२ पं० 'विशदय्य' इति यकारद्वयवान् पाठो ज्ञेयः। १० पृष्ठे ७ पं० 'अवलोकयिष्यामः' इति पाठो न मामकीनः; किन्तु—'अवलुलोकयिषामः' इतिसन्नन्त प्रयोग एव ममाऽभिमतः। ८ पं० 'परीक्ष्याम्' अत्र 'परीष्टयां' 'परीक्षायाम्' इति वा पाठो मम। १० पं० 'द्वादशभिर्व्वर्षैः' इति पाठो ज्ञेयः। १८ पं० 'निर्म्मितिः' इति सरेफ पाठः स्यात्। १२ पृष्ठे—पूर्वाऽङ्कत्रुटिसूचनायाम् 'अस्मिल्लेखे' अत्र अनुनासिक मुद्रणं न जातम्॥ टिप्पण्याञ्च—'निषिद्धव्यवधानान्न णः' इत्येव ज्ञेयम्॥ पाठका इमा मदुक्तदिशा संशोध्य ततो मन्निवन्धं पठन्त्विवति निवेद्य विरम्यते॥

दीनानाथ शर्मा—शास्त्री

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परीक्षा·गुणदोष·विमर्शः

(पूर्वतोऽनवर्तते)

(श्री पं० दीनानाथ शर्मा शास्त्री सारस्वतः मुल्तानस्थः)

अग्रे गतिर्विधीयताम्–परीक्षायां केवलमुत्तीर्णतायाएव विचारो व्यवस्थाप्यते, न खलु योग्यतायाः। सत्यमप्येवमेव। यदि योग्यताया एव विचार आचर्य्येत तर्हि तु 'व्याकरण' मेव केवलं द्वादशभिर्वर्षैरधिगम्येत, इतरेषां ग्रन्थानामधीत्यै त्वन्योऽवधिरपेक्ष्यते। अयं परीक्षा दोषएव, यदत्यन्त संकुचित समयो भवति तत्कृते। अतएव विद्यार्थिनः पुस्तकानि आमूलाद् आचूडं कार्त्स्न्येन न पठन्ति केवलं परीक्षोपयुक्त पाठमेव पिपठिषन्ति तत्रापि व्युत्पित्सा तेषान्न भवति केवलं परीक्षोत्तरणनिमित्तमेव अध्यापकद्वारा तत्र चिह्नानि संयोज्य तत्पाठं स्मरन्ति। अध्यापका यदि योग्यता विवर्धनार्थं सर्वंञ्चित्पुस्तकं पिपाठयिषेयुः, अथवा अन्यत् तत्संबद्धमवबोधयिषेयुः परीक्षा लुब्धा विद्यार्थिनस्तत्रापेक्षन्त एव। फलमेतज्जायते, यत्–परीक्षकेण यदि कश्चिद्योग्यताप्रश्नः पृच्छ्यते, तत्र ते चीत्कुर्वन्ति, समाचारपत्रेषु च परीक्षकान्निर्भर्त्सयन्ति। नायं दोषः परीक्षकानां नवापि विद्यार्थिनां किन्तु परीक्षाया एवायं दोषः' तत्र ईदृक्त्वमवश्यमापतति। अत एव विद्यार्थिनः पुस्तकावबोधनस्थाने तद् घोषणएव सादरा भवन्ति। तेनैव परीक्षा प्राप्तशिक्षायाः स्थायि प्रभावो न तिष्ठति। नवीन कक्षा प्रवेशे च प्राक्तनश्रेणीया ग्रन्था अपि विस्मर्य्यन्ते। तत्र कारण मापततएव ज्ञानकारणस्य घोषणस्य च। घोषणेन मस्तिष्कस्य यादृशी क्षीणता जायते सा ना विदिता तद् व्यसनिनाम्—"स्थाणुरयं भारहारः किलाभूत्" इति वचनमेव तत्र प्रकाशमर्प्यति। इतश्च विद्यार्थिनो गतवर्षीयानि प्रश्नपत्राणि समालोक्य परिशेषानुमानेन तत्पृष्टचरातिरिक्त प्रश्नानाम् अथ च गतात् पूर्ववर्षीय प्रश्नपत्रस्थानां सर्वेषां प्रश्नानामुत्तराणि स्मरन्ति। अथ च प्रायः कठिनानां पृष्टव्यानाञ्च प्रश्नानामुत्तराणि—कण्ठोपकण्ठीकुर्वन्ति। तत्फलमेतद् भवति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्-अत्यन्त सुगमप्रश्नबद्धं प्रश्नपत्रन्तेषां कृते कठिनम्भवति, यतस्ते सुगमप्रश्नानामुत्तराण्युपेक्षन्त एव। कदाचिच्च गतवर्षीयप्रश्नाः पुनः पृच्छ्यन्ते परीक्षकैः, विद्यार्थिनश्चाऽमून् न स्मरन्ति, ततश्च तानेव प्रश्नान् पृष्टान् दृष्ट्वा परीक्षकान् विश्वासघातकान् मन्वते। इतश्च यया कयाऽपि विधया त उत्तीर्य्याऽपि पश्चादध्यापकत्वम्प्राप्य अध्यापन कर्म्मणेऽनलम्भवन्ति । ततश्च केचिद्विद्यालयांस्त्यजन्ति । केचन च रात्रावपरस्मात् पण्डितात् पाठनीयम्पाठं पठित्वा पुनश्छात्रतामिवाऽऽपद्यन्ते । अपरस्मिन् दिने च तत्पाठयन्ति । तत्राऽपि विशिष्टशङ्कासमाधानङ्कर्तुमनलम्भूष्णवो भवन्ति, एवं लोके हास्याऽऽस्पदं भवन्ति, तेषां योग्यतापरिचायकं परीक्षाप्रशस्तिपत्रमेव (Certificate) केवलम्भवति। तन्मात्रमेव प्रपद्य हर्षप्रकर्षमश्नुवते। केचिच्च यद्यपि सर्व्वाण्यपि पुस्तकानि पठन्ति, तेऽपि परीक्षकेण सामान्यान् प्रश्नान् पृष्टान् दृष्ट्वा तस्मै क्रुध्यन्ति, यद्-दुष्टेन परीक्षकेणाऽस्माकम्परिश्रमस्य वैयर्थ्यं व्यधायि। युक्तमपि वर्त्तत एतत्। अस्माभिरपि बहुशो दृष्टम्, यत्कदाचित् परीक्षकाः प्रष्टव्यान् काँश्चित् प्रश्नान् पृच्छन्त्येव न, कानिचित्तु प्रकरणानि सर्व्वथाऽस्पृश्यानीव मत्वा तत्र कमपि प्रश्नमपि नातन्वते; तेन विरक्ता विद्यार्थिनो व्युत्पत्तिनैरपेक्ष्येण यदि घोषण एव सादराः स्युः, परीक्षोपयुक्त कृत्यनिष्पादन एव बद्धपरिकरतामालम्बेरन् यदि; तर्हि तेषामत्र को दोषः।

इतोऽपि दृष्टिर्निक्षिप्यताम्—वर्त्तमानपरीक्षाः स्वास्थ्यविनाशिन्यः, कृशिमापादिन्यः, उपनेत्रारोपिण्यः, चारित्रविकारिण्यः, कपटपाटवशिक्षयित्र्यः. ईर्ष्यालोभचिन्तादिवर्द्धयित्र्यो धनानां नाशयित्र्यो योग्यताविरहयित्र्यो, मातापित्राचार्य्यादिभक्तिविस्मारयित्र्यश्च विद्यन्ते।

अन्यदपि दृश्यताम्—परीक्षायामयमपि महान् दोषो यत्—परीक्षाभिन्नसाहितीप्रचारो न जायते। परीक्षानियतग्रन्थांस्तु क्रियासमभिहारेण पश्यन्ति जनाः, ग्रन्थान्तराणि तु योग्यताधायका-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यपि तैरस्पृश्यानीव मन्यते। तर्हि ते सीमितपुस्तकानामेव पण्डिता भवन्ति, अदृष्टचराणां पुस्तकानां लापने तेषामशक्तिरेव भवति। तेनेमᳶ परीक्षा घृतबिन्दुमिवाऽम्भसि बुद्धिं विधापयन्ति, न किल तैलबिन्दुरिवाऽम्भसि विद्याऽर्थिप्रतिभा विकासमापद्यते। अथ च कश्चनोत्साही यदि नव्यकाव्यम्प्रकाशयति, परीक्षालुब्धानामौदासीन्यात् कोऽपि तज्जिघृक्षुर्नोदेति, एवञ्चोत्साहिनामुत्साहश्शीघ्रमेव नश्यति। परीक्षायां नैयत्येऽपि काठिन्यम्भवति। यावद्विश्वविद्यालयीयपुस्तकनियामकानां चाटुपटुता, तेभ्य उत्कोचप्रदानम्, तदीयोदरपूर्त्तिः, तैस्सत्रा सम्यक्परिचयश्च वा न भवेत्, तावन्नव्यकाव्यं तत्र न नियमयितुं शक्यते, तस्य काव्यस्यास्वादमन्ते उवजिह्विकाजिह्वा एव गृह्णन्ति।

अथ चाऽद्यत्वे परीक्षा भृतिं भाविधनार्ज्जनमेव वा प्राधान्येनोद्दिश्य प्रविश्यन्ते न तु संस्कृतविद्याप्राप्त्युपाय इमा, यद्वा संस्कृताऽध्ययनमस्मत्कर्त्तव्यमिति, अथवा स्वधर्म्मज्ञानमासां प्रधानलक्ष्यमिति धिया वा; तत्फलमेतद्भवति—अन्तिमपरीक्षोत्तीर्णतायामध्यापकताऽलाभेन स शोकभाग्भवति, विचारयति च, "गच्छात्रत्वे तु क्षेत्रेषु भोजनमपि लभ्यते स्माऽनायासम्, अधुना तदपि दुर्लभमजनि, एतस्या उत्तीर्णतायास्तु अनुत्तीर्णतैव श्रेयस्यासीद्"—इत्थं स्वविद्यावृद्धावसन्तुष्टा धनमेवाऽन्तिमसुद्देश्यमध्यवस्यन्ति।

पाठकमहाभागाः! न जानीमहे—किं दिदर्शयिषन्तो वयं कोपाढौकिष्महि, अनुमितचरो द्राघिमाऽपि जातः*। अत एव दिदर्शयिषितव्यस्याऽपि दोषवृन्दस्य लोभं विमुच्य तद्-गुणगणमतिसङ्क्षेपेण विशदय्य प्रस्तावममुं समापिपयिषामः, अवधीयतामनुग्रहदृक्प्रदानेन।

अद्यत्वे आवश्यकताबाहुल्यसद्बान्निज-विविधविधेय व्यापृतमनसᳶ पुमांसᳵ किमपि संस्कृतसाहितीपुस्तकं न दिदृक्षन्ते, न वा

*द्राघिमा जातः। पृथ्वादित्वादिमनिच्। 'प्रियस्थिर'ति द्राघादेशः। इमनिजन्तः पुंसि भवति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्रष्टुं पारयन्ति। परीक्षाव्याजेन तु अध्ययनम् अध्यापनं वा द्वारीकृत्य तत्पुस्तकस्य आमूलचूडं दर्शनाऽवसरः प्राप्तुं शक्यते। एतस्य प्रबल-प्रमाणमेतदेव, यद्—अध्यापका विद्यार्थिनश्च परीक्षाऽतिरिक्तसाहित्यं पश्यन्त्येव न। यस्य पुस्तकस्य विश्वविद्यालयद्वारा परिवर्त्तितस्य पञ्चषाणि वर्षाणि व्यत्ययुः, अथवा यत्पुस्तकं प्राक् कदाऽपि विश्व-विद्यालयेन न नियमितम्, अत एव च यत्पुस्तकं वयं न विलोकयामः, न वाऽवलोकयिष्यामः तदेव पुस्तकं यदि विश्वविद्यालयसंस्था संस्था-पयति, निर्वाचयति च परीक्ष्याम्; तदाऽवश्यं तदवलोकने बाध्या भवामः; तदपदेशेनैव च तत्पुस्तकं कात्स्न्र्येन दृश्यते।

अन्यच्च—यः खलु व्याकृत्यादि विषयो द्वादशभिवर्षैः प्राक्-चिरात् समाप्यते स्म, स एव परीक्षार्थिना विद्यार्थिना षड्भिरेव वर्षैः समाप्यते, तत्र प्रणिधानदानेन च तदीयं सुफलमप्याशास्यते। एव-ङ्कारं पुरुषकारं कारंकारं विषयान्तरेष्वपि नदीष्णता जञ्जन्यते।

अथ च—वर्त्तमानपरीक्षाभिर्लेखेऽपि लाभाऽतिरेको निभाल्यते। प्राचीनपण्डिताः प्रायो मौखिकविद्वांसो भवन्ति स्म, अद्यत्वेऽपि तादृशा गवेषणया न दुरापाः; ये व्याकृत्यां प्रथितार्हन्तीकाः परकीय-लेखस्खलनप्रदर्शनेऽपि कुशलाः, तेषां स्वयमेव लेखलेखने न प्रवृत्तिः। लेखलेखनात्ते वृद्धाः शीतादिव बिभ्यति। कस्यचित् प्रस्तावस्य निर्म्मि-तिस्तु तेषां कृते महाभयावहा। तेषां लेखेषु अशुद्धिभूयिष्ठता-विशृङ्ख-लता प्रभृतयो दोषास्तु सुलभा एव। अत एव ते समाचारपत्राणि न दिदृक्षन्ते, न वा शुश्रूषन्ते, तानि (पत्राणि) च केवलं निन्दन्त एव तिष्ठन्ति। सत्यम्—

'अशक्तास्तत्पदं गन्तुं ततो निन्दां प्रकुर्व्वते।'

परं वर्त्तमानपरीक्षोत्तीर्णास्तु प्रायो लेखप्रस्तावादिसम्बन्धे प्रथितयशस्काः, प्रतिभाप्रतिभाताः, सामयिकज्ञानशालिनश्च सन्ति। अत्रैव किमु—अन्येष्वपि उच्चावचेषु व्याख्यानादिकर्म्मसु समिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभृतिकार्य्यसञ्चालने, उत्सवादिनवीनप्रबन्धनकृतिषु, आडम्बरादिषु च (आचारप्रचारे यदि नाऽपि स्युः) परं पटिमानं कलयन्ति ।

अपि च—वर्त्तमानपरीक्षोत्तीर्णा धनाऽर्ज्जनादिकर्म्मसु, कूपमण्डूकताऽपसारणायां विदेशादिभ्रमणे, अपरिचितेन सहाऽऽलाप शैल्यभिज्ञतायां, सभ्यतायां, क्षीरनीरनिर्णायनीरप्रतिनिधिस्वयशोराशि-विस्तारणे समाचारपत्रादिसम्पादने च अतादृशानाम् (अनाघ्रातपरीक्षाणाम्) अपेक्षया नायकायमानास्सन्ति ।

परीक्षोत्तीर्णतया च प्रायोऽध्यापकता मासिकवेतनप्राप्तिरपि च जायते, येन धनसंग्रहं विधायाऽऽवश्यकता बहुलेऽस्मिन् युगे स्वकीयाऽऽवश्यकता॒ प्रपूरयितुमपीशानो भवति, क्षेमस्थेमा च भवति तदीयः ।*

योग्यतया चाऽन्तिम परीक्षोत्तीर्णो वैदुष्यस्य पात्रम्भूत्वाऽभ्यस्तसमस्तविषयः समस्तविषयमयसाहित्ये प्रवर्त्तितुं क्षमताशाली भवति। एतच्च्रेयं॒ प्राय॒ पञ्चनदीयानां शिरसि, यतोऽन्यत्यासु परीक्षासु प्रायस्सर्वेषामेव विषयाणां निवेशो भवति । प्रान्तान्तरीण परीक्षासु तु प्राय एकाङ्गिनामेव विदुषामुत्पादो जायते, न तु सर्वाङ्गीणानाम् । अयम्मन्तव्यताविषय एव यद्—एकाङ्गिनां योग्यता परिनिष्ठिताऽवश्यम्भवति एकस्मिन् विषये, परं विलक्षणविचक्षणा अपि ते विषयान्तरेष्वगतिका एव भवन्ति। कैवलव्याकृतिपरिनिष्ठित॒ काव्याद्यन्य साहित्यानन्दं प्राप्तुं न खलु क्षमते । सर्वाङ्गीणास्तु प्रायस्सर्वेष्वेव विषयेषु सत्वरगत्वरा भूत्वा स्वकीयं कार्य्यं निर्व्वोढुं शक्तिभाजो जाजायन्त एव । अस्तु—

परीक्षादिव्योपगूढाश्च जनाश्शीघ्रलेखलेखने नियतकालं लेखसमापने च पेशला भवन्ति, तदीयो लेखप्रकारो विशिष्टशैलीको हृदयस्पृक् च भवति। अतथाभूतानां तु न तथात्वम्भवति। तदीयं लेखमान्द्यादिकं शैलीसाधारण्यञ्च प्रथितमेव सर्वत्र ।

---

* क्षेमस्थेमा तदीयः । स्थिरस्य भावः स्थेमा । इमनिजन्तत्वात् पुंसि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्रिमविचारेऽस्माभिर्द्राघिमाऽनुमीयते; यः समाचारपत्राणां शत्रूयितः; तेनाऽयन्निबन्धोऽत्रैव समाप्यते । अन्यदन्यदा कदाचन ॥ इति ॥ *

नोट—अस्मिल्लेखे गतसंख्यायां चतुर्थपृष्ठस्य १३ पंक्तौ 'आलिङ्गति' इत्यत्रमुद्रकैः 'आलिङ्गते' इत्यशुद्धं मुद्रितम् ॥ अनुस्वारस्थाने च बहुत्र 'अनुनासिको' मुद्रितः; पाठकैः स्वयं शोधनीयम् । सामान्या मुद्रकाऽशुद्धयोनाऽङ्किताः" इति ।

धर्ममीमांसा

(ले०—प्र० स्वा० धर्मदेवः सिद्धान्तालङ्कारो विद्यावाचस्पतिः कल्याणपुरम्, वंगलौर,)

लेखकप्रणीतवैदिकधर्मस्मृतेः संकलितोऽशः प्रथमाध्यायात्

अथ धर्मस्य मीमांसां, करिष्यामि मनीषिणः ।
यथा वेदादिशास्त्रेषु, विहिता सा प्रदृश्यते ॥१॥
धारणाद् धर्म इत्याहुर्धर्मो धारयते प्रजाः ।
यत्स्याद् धारणसंयुक्तं, स धर्म इति निश्चयः ॥ म० भा०
निरुक्तिमेवं धर्मस्य, भगवान् बादरायणः ।
प्रोवाच भारते सम्यग्, निगमागमतत्त्ववित् ॥२॥
यतोऽभ्युदय निःश्रेयस सिद्धिर्धर्मः उच्यते ।
कणाद एवं धर्मस्य, लक्षणं विदधे मुनिः ॥३॥
एहलौकिकमप्येवं, धर्मान्तर्गतमेव हि ।
न तत्र संशयो जातु, मतिमद्भिर्विधीयताम् ॥४॥
या प्रथा लौकिकोत्कर्षे, बाधिका सङ्घनाशिनी ।
अपि रूढ़त्वमायाता, न सा धर्मानुमोदिता ॥५॥
तस्मादेवं विधारूढिः, परित्याज्या द्रुतं बुधैः ।

---

* "गतसंख्यायां ३।३ मुद्रकादीनामसावधानतया—तृतीयपृष्ठस्य द्वितीयटिप्पण्यां 'निषिद्धगत[illegible]' इत्यत्र 'यया' इति ॥ ([illegible])

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यतो धर्म परित्यागः, श्रेयसे न भवेत्क्वचित् ॥६॥
धर्मस्य लक्षणं ह्येतन्नितान्तं सारगर्भितम् ।
सदा मनसि सन्धार्यं, धर्मजिज्ञासुभिर्जनैः ॥७॥
धर्मा वैयक्तिकाः केचित्, केचित्कौटुम्बिका मताः ।
सामाजिकास्तथा केचिद्, राष्ट्रीया इतरे शुभाः ॥८॥
व्यक्तिं समाजं राष्ट्रं च, धर्मो धारयते यतः ।
तस्मात्तस्यपरिज्ञानमावश्यकतमं मतम् ॥
"धृतिः क्षमा दमोऽस्तेयं, शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो, दशकं धर्मलक्षणम् ॥९॥ मनु० ६।९२।
अहिंसा सत्यमस्तेयं, शौचमिन्द्रियनिग्रहः ।
एतत्सामासिकं धर्मं, चातुर्वर्ण्येऽब्रवीन्मनुः ॥ मनु० १०।६३।
इत्थं वैयक्तिकान् धर्मान्, सर्वेभ्यो हितकारकान् ।
मनुः प्रोवाच भगवान्, वेदशास्त्रप्रमाणतः ॥१०॥
धर्मानेतान् सदाचर्य, शुभाभ्युदयसाधकान् ।
निःश्रेयसे सहायांश्च, जनः सर्वः सुखी भवेत् ॥११॥
अहिंसा सत्यमस्तेयं, ब्रह्मचर्यापरिग्रहौ ।
एते यमाः समाख्याताः, योगशास्त्रे महात्मना ॥१२॥
पतञ्जल्याख्यमुनिना, सर्वभूतहितैषिणा ।
इमे सदा सेवनीयाः, शाश्वतीं शान्तिमीप्सुभिः ॥१३॥
शौचः सन्तोषतपसी, स्वाध्यायो जपपूर्वकः ।
ईश्वरप्रणिधानं च, पञ्चैते नियमाः स्मृताः ॥१४॥
धर्मस्य साररूपत्वाद्, योगाङ्गत्वात्तथैव च ।
एषां वैयासिकीं व्याख्यामनुस्मृत्य निगद्यते ॥१५॥
अद्रोहः सर्वभूतानां, सदा सर्वत्र सर्वथा ।
कर्मणा मनसा वाचा, अहिंसाव्रतमुच्यते ॥१६॥
सत्यं सत्ये वाङ्मनसे, सर्वभूतहितेप्सया ।
वञ्चनभ्रान्तिरहिता, वाणी सत्यमिहोच्यते ॥१७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्पृहा रूपमस्तेयं, मुनिभिः समुदीरितम् ।
वेदवाक्यमनुसृत्य, 'मा गृधः कस्यस्विद्धनम्' ॥१८॥
संयमो मानसस्येह, इन्द्रियाणां तथैव च ।
रेतसो रक्षणं सम्यग्, ब्रह्मचर्यमिति स्मृतम् ॥१९॥
ब्रह्मेति वेदपर्यायस्तथैवेश्वर वाचकम् ।
ब्रह्मचर्यं तपोज्ञानप्राप्त्यर्थं व्रतमुच्यते ॥२०॥
"ब्रह्मचर्येण तपसा, राजा राष्ट्रं विरक्षति ।
आचार्यो ब्रह्मचर्येण, ब्रह्मचारिणमिच्छति ॥"
"ब्रह्मचर्येण तपसा, देवा मृत्युमुपाघ्नत ।
इन्द्रो ह ब्रह्मचर्येण, देवेभ्य स्वराभरत् ॥" अथर्व० ११।६।
इत्यादिकेषु मन्त्रेषु, महिमाऽस्य निबोधितः ।
तस्मात् तत्सर्वदा सेव्यं, सर्वशक्तिनिधायकम् ॥२१॥
न बाह्यविषया नूनं, शाश्वतानन्ददायकाः ।
इत्यनित्यत्वमास्थायानासक्तिरपरिग्रहः ॥२२॥
शौचं तु स्यात्पवित्रत्वं, बाह्याभ्यन्तरं द्विधा ।
बाह्यं मृदादि संशुद्धिरान्तरं चित्तशोधनम् ॥२३॥
ईर्ष्यामानादयो दोषाश्चित्तस्याशुद्धिकारकाः ।
तेषामाक्षालनं सम्यक्, शौचमाभ्यन्तरं मतम् ॥२४॥
सन्तोषो लुब्धताऽभावस्तपो द्वन्द्वसहिष्णुता ।
शीतोष्णसुखदुःखादि द्वन्द्वेष्वपि समानता ॥२५॥
प्रारब्धधर्म्मकार्यस्य, परित्यागो न जातु चित् ।
घोरासु विघ्नबाधासु, समायातास्वपि ध्रुवम् ॥२६॥
तपस्तत् त्रिविधं प्रोक्तं, कायिकं वाचिकं तथा ।
मानसं चेति भगवान्, कृष्णः प्रोवाच तत्त्ववित् ॥२७॥
व्याख्या च तस्य तपसस्त्रिविधस्य सुशोभना ।
गीतायां दृश्यतेऽत्यन्तं, बोधदा शान्तिदायिनी ॥२८॥
"देवद्विजगुरुप्राज्ञ—पूजनं शौचमार्जवम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मचर्यमहिंसा च, शारीरं तप उच्यते ॥
अनुद्वेगकरं वाक्यं, सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव, वाङ्मयं तप उच्यते ॥
मनः प्रसादः सौम्यत्वं, मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्, तपो मानसमुच्यते ॥ (गीता अ. १७)
स्वाध्यायो मोक्षशास्त्राणामधीतिरथवा जपः ।
प्रणवादिपवित्राणामिति कार्यः स सन्ततम् ॥२९॥
ईश्वरप्रणिधानं तु, सर्वकर्मार्पणं सदा ।
सर्वश्रेष्ठे गुरौ तस्मिन्, ज्ञानिभ्यो ज्ञानदायके ॥३०॥
ईश्वरः कोऽस्त्यसौ यस्मिन्, समर्प्यं कर्म मानवैः ।
स्वरूपं तस्य किं प्रोक्तमथेदानीं निरूप्यते ॥३१॥

"सपर्यगाच्छुक्रमकायमव्रणमस्नाविरं ँ शुद्धमपापविद्धम् । कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥" (यजु० ४० । ८)

इत्थं हि वेदेषु महेश्वरस्य, निरूपितं चारुतया स्वरूपम् ।
स एव लोकाधिपतिः स्वयम्भूरिति श्रुतिर्व्यक्ततया ब्रवीति ॥३२॥
"दिव्यो गन्धर्वो भुवनस्य यस्पतिरेक एव नमस्यो विक्ष्वीड्यः ।
तं त्वा यामि ब्रह्मणा दिव्यदेव, नमस्ते अस्तु दिवि ते सधस्थम् ॥
"य एक इत्त मुष्टुहि, कृष्टीनां विचर्षणिः ।
पतिर्जज्ञे वृषक्रतुः" इति ऋग्वेदशासनम् ॥
सर्वेश्वरः सर्वगतोऽद्वितीयः समस्तशक्तिर्भगवाननन्तः ।
स एव नानाविधनामभिस्तु, संस्मर्यते यः स्वगुणानुरूपैः ॥
"इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः" ॥३३॥
(ऋ० १।१६४।४६)

इत्यादि मन्त्रा जगदीश्वरस्य, नामान्यनेकानि वदन्ति तस्य ।
किन्त्वेक एवास्ति स लोकनाथः, इति स्फुटं ते प्रतिपादयन्ति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"यो नः पिता जनिता योविधाता, धामानिवेद भुवनानि विश्वा ।
यो देवानां नामधा एक एव, तं सं प्रश्नं भुवना यन्ति सर्वा" ॥३४॥
इत्याद्यमन्त्रा इममेव चार्थमतीव सुव्यक्ततया वदन्ति ।
तस्मात्समस्तैरपि शान्तिकामैर्देवेश्वरोऽसौ मनसाऽर्चनीयः ॥३५॥
निराकृतिः सर्वगतोऽतिसूक्ष्मो नतस्य रूपं किमपीह विष्णोः ।
स एक कर्ता जगतो विधर्ता, हर्ता स एवास्ति समस्तशक्तिः ॥३६॥
ब्रह्मा स उक्तो विबुधैर्बृहत्त्वाद्, विष्णुः प्रवेशान्निखिलेऽपि लोके ।
शिवः स कल्याणकरो दयालुः, शान्ति प्रदत्वात्स च शम्भुरुक्तः ॥३७॥
इन्द्रः स सर्वेश्वर एक एव, गणाधिपत्वाद्गणनायकः सः ।
ज्ञानस्वरूपोऽग्निपदाभिधेयो मित्रः सुहृद् वायुरनन्तशक्तिः ॥३८॥
एवं हि नामानि सहस्रशस्तं, परेश्वरं साधु विबोधयन्ति ।
यस्यस्वरूपं कथयन्ति वेदाः, 'ओतः स प्रोतश्च विभुः प्रजासु" ॥३९॥

(क्रमशः)

भारतभूषणो महाराणा प्रतापः

(४)

(पूर्वावशिष्टः)

(ले०—कूलभूषणः)

भाग्योदयो लक्ष्म्याश्चमत्कारश्च—

देशत्यागसंकल्पात्मकं महाराजस्य वृत्तमिदं श्रुत्वा कश्चिद्भामानामा वृद्धराज्यपूतामात्यः श्रीप्रतापचरणारविंदयोरन्तिकमाजगाम। यथाविधि प्रणम्य महाराजाय मातृभूमिरक्षायै प्रभूतञ्च धनराशिं प्रतिजज्ञे । अभाणीच्च "शूरवर ! मेवाड़भूमिं यवनहतकहस्तान्मोचयितुं महान् क्लेशोऽनुभूतस्त्वया—ममापि पुत्रौ राजसेवया वीरगतिङ्गतौ, ऋते भवतो नास्ति मम सम्पत्तेः कश्चिदधिकारी लाभो वा। विरमेदानीं देशत्याग संकल्पात्—नयेथाश्च यथापूर्वं जन्मभूमिभारापहरणाय स्वातन्त्र्यसंरक्षायै च काल" मिति—अतीव विस्मितो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हर्षोत्फुल्ललोचनारविन्दो-महारथी एतादृशमुदन्तमवगम्य वृद्धामात्येनार्पितस्योपहारीकृतस्यौपढौकितस्य वा धनस्य ग्रहणे सर्वथात्मानमसमर्थमेव-मा गृधा कस्यचिद् धनम्—इत्यादि वैदिकनिदेशानुमतेनामन्यत। परन्तु नानाविधैः शास्त्रोक्तैर्नीतिवचनैः सम्यक् संबोध्य 'कर्तव्यमेवैतत्त'—इति च तमवगतार्थं विधाय परम्परया संचितं सर्वमेव राज्यकोशाद्धनराशिं तस्मै उपढौकितं जरठेनामात्येन।

एवं पुनरपि संप्राप्त लक्ष्मीको महाराजो विविधां नवीनां सेनां संयोजयामास द्विगुणितोत्साहश्च शत्रोर्हस्तङ्गतान्यनेकानि स्थानानि देशान् ग्रामान् पत्तनानि चाचिरादेवे जेतुं स्वाधीनतां नेतुं क्षमोऽभवत्। यावनाः सेनान्यः ससेना महाराजस्य देशत्यागविषयकं संकल्पमवगम्य प्रमादेन निष्प्रतीकारा एवावातिष्ठन् नृत्येषु मद्योत्सवेषु आहारेषु कामिनीविलासेषु धूम्रपानेषु मादकद्रव्यसेवन एव च कालमत्यवाहयन्। तां च तथाविधां विषयलोलुपतां तेषां विज्ञाय महाराजोऽपि संनद्धसंनाहः कतिपयैरेवाहोभिः कमलनगरदुर्गमुदयपुरीयां राजधानींश्च स्वात्मसात् संचकार ह। उदयपुर निवासिनां प्राचीनानां राज्याधिकारिणां हृदयानि चात्यन्तमेवाह्लादयां बभूव। विचित्रञ्चेममुदन्तमवगम्य सम्राडकूबरः खिन्नहृदयः पुनरपि महाराजेन साकं योद्धुं त्वरितमियेष। रिपुभिर्बलवत्तरैः पीड्यमानो मेवाडमेदिनीं निखिलामेव ऋते चित्तौड़दुर्गं प्रतापसिंहाय तदा तत्याज। महाराजा प्रतापोऽपि दैवानुकूलतया भाग्योदयाच्च राजधानीं पुनरपि प्राप्य प्रजापालनादिकमिति कर्तव्यं सम्यन्निर्वाहयन् यवनेभ्यः शेषं चित्तौड़ दुर्गञ्च प्रतिनेतुमनिशं प्रायतत्॥

सिंहावलकोनम्—

यद्यपि देहलीश्वरः प्रतापसिंहं किञ्चिद्दिष्टं राज्यपूतस्थाने स्वातन्त्र्येण प्रजापालने विससर्ज तथापि विचक्षणस्य महाराजप्रतापसिंहस्य चेतसि क्रूरयवनेन प्रहितया पुनरपि सैनया मेवाडमेदिनीं स्वाधीनां विधातुं सर्वदा शङ्कैवासीत्। असकृच्च व्यचिन्तयन्महाराजः—यत् जीवति मयि येनकेनाप्युपायेन स्वातन्त्र्यं भवितुमर्हति परन्तु न जाने

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं भवेन्मद्देहत्यागानन्तरम् ? अधुनाऽपि चित्तौडदुर्गं शत्रुहस्तगतमेव। यस्या मेवाडभूमेरक्षणार्थं महाराजबाप्पारावललक्ष्मणसिंह प्रभृतयः स्वप्राणान् सर्वस्वञ्च समर्पयन् राज्यपूतललनापावित्र्यं गोप्तुं धवलकीर्तिपताकायाः सच्चरित्रवत्या देव्या पद्मिन्या विमलं स्वच्छं शरीरं चित्तौडदुर्गमृत्तिकायामेव भस्मसाद्भूतं— न केवलमिदमेव— अपितु द्विसहस्रभारतक्षत्रियललामभूतस्य देशस्यास्य स्त्रियः देशमर्यादां पातिव्रत्य धर्मांश्च पालयन्त्यो वह्नौ प्राविशन् तस्यैव देशस्याधिपतेः पुत्राः पौत्राश्च यवनसभामलंकुर्युः मदनन्तरम् ? यस्मिन् देशे पन्नादेव्या मम पितुरुदयसिंहस्य प्राणरक्षणार्थं स्वसुतं क्रूरस्य राज्ञः खड्गायोपहारीकृतं तद्देशीया भाविनो राजानो दिल्लीश्वरस्य सेवां करिष्यन्ति किम् ! हा हन्त दुर्दैव ! हा काल ! कुटिलगते ! इति खिन्नमनस्को राजा विचारैरेतादृशैः कायक्लेशानसह्यानभजत। चिन्तासागरे अपारे मग्नश्चाचिरादेव वेगेन ज्वरजर्जरितः वेदनापीडितोऽभूत्।

युवराजायोपदेशः—

आहूय च स्वसमीपं युवराजं तस्मै स्वीयां कायक्लेशजां व्याधिं हृत्तलोत्थिताञ्चाधिमावेदयन्नकथयत्—वत्स ! त्वमेवेदानीं मदनन्तरं सांसारिकाननित्यान् विषयभोगान् परित्यज्य सावधानेन मनसा पितृव्रतपालको भूत्वा स्वकर्तव्यमनुतिष्ठ भुङ्क्ष्व च भूमिमिमाम्। यस्मिन् काले पितुराज्यरक्षामकरवम्—तदैवारिहस्तात् चित्तौड़दुर्गं स्वातन्त्र्यतां नेतुं शपथमकरवम्। तस्मादेव दिवसात् मृण्मयेषु पात्रेषु भोजनं पर्णकुटीषु निवासः, तृणमेव शय्या सर्वञ्च राज्यलक्ष्म्याः प्राकृतमैश्वर्यमपहाय स्वार्थसाधनाय नियतमानस्कोऽस्मि संवृत्तः। त्वमपि मम प्रतिज्ञां पालय विषयभोगसुखमपहाय सिसोदिया कुलपावित्र्यं संरक्षय। पितुर्वचनैरेतैर्युवराजस्य मनसि यद्यपि शोभनापावना विचारास्समुत्पन्नास्तथापि क्षणिकं तेषां प्रभावं दृष्ट्वा महाराजस्य ज्वरक्लेशोऽत्यन्तमेव ववृधे।

प्राणत्यागपूर्विका भीष्मप्रतिज्ञा–राज्यपूतसामन्ताश्च—

संप्राप्ते वीरकुलतिलकस्यास्यान्तिमसमयेऽतिनिकटे भारतललामतिलकप्रभांशान्तावसरे वनवासमित्राणि हार्दिकास्सुहृदश्च सर्वे महाराजस्य दशामिमामनुभवतस्तदन्तिकं पर्णकुट्यामेवाजग्मुः। तस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चरमां जर्जरां शरीरावस्थां निरीक्ष्य साञ्जलिबद्धं निवेदयामासुः— नाथ ! किमर्थं प्राणत्यागकालेऽस्मिन् क्लेशो महाननुभूयते श्रीमद्भिर्मेवाड़दिवाकरैरस्तावलम्बिभिः । महाराजस्तु सर्वांस्तान् युवराजाय पूर्वमेवोपदिष्टान् मानसिकान् विचारान् पुनरपि प्रकटयाञ्चकार । तेभ्यो निखिलेभ्योऽपि तद्व्रतपालनमादिदेश—'यदि यूयं यावच्छक्तिर्जीवनं वा मेवाड़राज्यस्वातन्त्र्यव्रतशपथं कुर्वीथा येन दिल्लीश्वरो मदनन्तरं कथञ्चिदपि ममोत्तराधिकारिणां स्वातन्त्र्यं नापहरेत्, यदि यूयं चित्तौड़दुर्गं प्रतिजेतुं प्रतिज्ञामकरिष्यन्त तर्हि मया प्रतिष्ठापितस्य स्वतन्त्रस्यास्य राज्यस्य यशोहानिरन्यापि काचन क्षतिर्नाभविष्यत् । यद्ययं मम तनूजो विषयभोगलालसां परित्यज्य पुत्रवत् प्रजाः पालयेत् यूयं चास्य कटिबद्धाः साहाय्यकाः भवेयुस्तर्हि मम प्राणाः सुखेन प्रतिष्ठेयुरिति' । ततस्तु तैरपि सम्मिलित्वा भीष्मासौ प्रतिज्ञा स्वीकृता येन महाराजोऽपि सुखेनासून् जहौ ।

उपसंहारः—

महापुरुषाणां जीवनं न कनकमयशय्यायां शयनं परन्तु सर्वमायुस्तेषां कायक्लेशैः सङ्कीर्णं सर्वोऽपि समयः परोपकारिणां महतां लोकहितायैव भवति । आबाल्यकालान्मरणं यावत् महाराणा प्रतापस्यापि सदैवदुःखमयमेव जीवनं दरीदृश्यते । स्वभावतः स्वातन्त्र्यपदलिप्सुः श्रीमान् राजराजेश्वरः सत्यसनातनधर्मसंरक्षको महाराणा मेवाड़ाधिपतिरुपरिनिर्दिष्टया रीत्या न केवलं स्वयशसा जगत्सर्वमभासयत् प्रत्युत भारतवर्षस्य चिरकालात्प्रचलितपद्धत्यनुसारमार्यसभ्यताया गौरवं स्वसच्चरित्रधाराप्रवाहधौतं शुक्लां सौषुम्णीं छविमिव सर्वत्र ख्यापयामास । तस्य तु सत्यं प्रेम, स्वातन्त्र्यजीवनस्पृहा, पराक्रमणदेशोपप्लवशमनाय दृढं तपो, विदेशीयेभ्यो यवनेभ्यो मातृभूमेर्बन्धनमोक्षरूपा दृढा प्रतिज्ञा विषयभोगानामनासक्तिरनन्यसदृशी धृतिः क्षमा दमश्चैतादृशाः गुणास्सन्ति यान् स्मारंस्मारमनुकुर्वाणा भारतीया युवानो ललनाश्चाधुनिके हि समये स्वजीवनेष्वपि महतीं शक्तिमुत्पादयितुं प्रभविष्णवो भवेयुरिति शम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवगिरः प्रसारः

(२)

(पूर्वतोऽनुवर्तते)

(ले०—पं० रघुनाथ वांगन्, शालाकदल, श्रीनगर)

श्रीरस्तु:—

यदि चापकृतमपहृतं वा सर्वं सर्वस्वं मूर्खतरैर्म्लेच्छैः; तथापि याति यथा चापकारितमपहारितं स्वात्मनैव भारतवासिभिः, न तथापकृतं म्लेच्छैः, प्राच्यापाच्यीयैराऽङ्ग्लपातालदेशशर्मण्यदेशीयैर्नैतादृकूव्यवहारः कृतः भारतवर्षे, परंच "आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः। बन्धुरात्मनस्तस्य, येनात्मैवात्मना जितः" मूर्खैं भारतवासिभि र्लोभेन पुस्तकानि विक्रीय द्वेषेण प्रच्छाद्य मोहेनासावधानतया च क्रमिभिः खादयित्वा किं न कृतोऽनाचारः ? नहि चौरस्य वा चौर्यतायाः कोपि दोषः, यः स दोषस्तु गृहपतीनामसावधानताया वा, प्रशंसनीयाश्चास्मन्मान्याः प्रिया आङ्ग्लदेशीया वान्यदेशीयाः; यैश्च स्वात्मोद्धारचिकीर्षुभिः स्वात्मानमुद्धृत्य परेप्युद्धारिताः।

आङ्ग्लहिस्ट्रीतो तत्र भवन्तः श्रीमन्त अपरिचिता न सन्ति, वर्ष सहस्रद्वयात्पूर्वं का व्यक्तिः का शक्तिः किं धैर्यं किं कार्यमासीदन्य देशवासिनाम्; परन्तु ये बुद्धिमन्तस्तेषां व्यवहारोऽपि तादृश एव भवति, उपचयापचयौ तु सर्वस्य जन्तोर्भोग्यावेव, न ह्यत्र स्वातन्त्र्यमाभजति कोपि जन्तुः, बुद्धिमन्त आपत्सु मग्ना अपि धैर्यं प्रगृह्य स्वात्मानं प्रोद्धारयन्ति, यथा चान्य देशीयैः कृतम्, पश्यताम्—

यथा च पूर्वं मुख्या आसन् काश्मीराः; तथैव धूम्रपाने मद्यपाने तासपत्र खेलने विधवा-विवाह करणाद्यश्रेष्टतमे कर्मणि ईर्ष्यायां-द्वेषे च मुख्या एवाधुनिकेपि समये, आङ्ग्लादिभिश्च न तथा कृतम्, ते तु स्वनियमेन नियन्त्रिताः सन्ति, वर्तमानकालीयावस्था न केनापि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राज्ञा भोग्या नापि भुक्ता, किमेतादृशी बुद्धिरासीत्-म्लेच्छीय समये ? न, तैस्तु संग्रह एव नाशितः; नान्धकारः ।

अन्यदेशीयैः पुस्तकानि बहुमुल्येन संगृह्यसुविचार्य-स्वात्मज्ञानमुत्पाद्य च पदार्थजातानामाविष्काराणि कृत्वा स्वात्मलाभउपार्जितः परे च परांकोटिं प्रापिताः—इति किं न कृतमन्यदेशीयैं विद्याबलेन ?

प्रकृतमनुसरामि—

"विद्या ह वै ब्राह्मणमाजगाम,
गोपाय मा शेवधिष्टेहमस्मि ।
असूयकाया नृजवे यताय,
न मा ब्रूया वीर्यवती तथास्याम् ॥"

भोः प्रियतमाः सभासदाः ! द्वे विद्ये वेदितव्ये परा चैवापरा च इति ह वेदविदो वदन्ति, षट् सरसिजानि निभिद्य दहरीये पुण्डरीके विश्रम्ये ब्रह्मसद्मनि योगयुक्त्या यया तदक्षरं ब्रह्माधिः धिगम्यते जीवेन सा परा; यदुत्तमता वैशिष्ट्यं स्वयमेव जना जानन्ति, शेषोपि सहस्रजिह्वाभिर्वक्तुं नान्तम्, किमु वक्तव्यमत्र विषयेऽस्माभिः ? तथापि—

योगसाम्राज्यदीक्षितानां नये तु योगः मंत्रयोग-लययोग-राजयोग-हठयोगतः चतुर्विधः, यद्यपि बहु विधत्वं योगस्य; परंतु प्रधान्येन चतुर्विधत्वमेव, "तत्र नियत समयमापुरश्चरणरीत्याऽऽत्ममंत्रदैवतैक्यभावेन मंत्रार्थचिन्तनं मंत्रयोगः" "गच्छतस्तिष्ठतः स्वपत भुञ्जतो यः सर्वत्र निष्कन्तेश्वराभासः चित्तन्तयात्मको वै एष-लययोगः" राजयोगस्तूपसनात्मकः; यत्र मंत्रयोगहठयोगावन्तर्गतौ, यमनियमासनप्राणसंयमप्रत्याहारधारणाध्यानसमाधिभिरष्टविधतामावहति हठयोगः; तत्र बाह्याभ्यन्तर चारमहिंसासत्यास्तेयदयार्जव ब्रह्मचर्यक्षमाधृति मिताहार शौचादिभिर्दशभिर्यमं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यमः, तपः संतोषास्तिक्यदान सिद्धान्तश्रवणदान ह्रीमतिजपोव्रतै-र्नियमोपि दशविधतामवहति, स्वस्तिक गोमुख पद्मवीरसिंह भद्रमुक्त-मयूर सुखासनेनासनं नवविधम्, विषयेभ्यःबलादाहरणं स्थानात्स्थानं पृथिव्यादितत्त्वानां च लयः प्रत्याहारः, दीपशिखा पर्वतसूर्यचन्द्रभ्र-मध्यादिषु मनसो धारणं धारणा, सर्वत्र निष्कलेश्वर चिन्तनं वैध्यानं मिति योगविदो वदन्ति, समाधिर्नाम संविदुत्पत्तिर्जीवेश्वरैकता यथा—

"नाहमस्मि न चान्योऽस्ति, ध्येयं चात्र न विद्यते। आनन्दपद संलीनं, मनः समरसी गतम्।"

ईदृशी काप्यऽचिन्तनीयाऽवस्था संभवेदितिशम्॥

अथ ऋग्वेदो यजुर्वेदः सामवेदो ऽथयर्वणः षडङ्गानि—शिक्षा-कल्पव्याकरण निरुक्तछन्दज्योतिषाणि न्यायमीमांसे पुराणधर्मशास्त्रा-युर्वेद धनुर्वेद गान्धर्वविद्या विद्याशास्त्रं चेत्यष्टादशविद्यात्मकमऽपरा विद्यास्वरूपम्।

एतासां विद्यानां स्वरूपनिरूपणेन विदुषामग्रे प्रलपनमेवेति मत्वा नैव किंचिदत्र विषयानुवादि उक्तम्।

ऐहिकामुष्मिक फलावप्तये तु सर्वस्य जन्तोः सुखतरमुपायम-ष्टादशविद्यात्मिका ऽपराविद्यैवेति सकलविदुषां मनःसु स्वत एव समुदेति नाम, को नामात्र विवादी ? कोपि न।

यत्तु केपि वादिनः प्राकृतस्यैवाऽऽद्यत्वमङ्गीकुर्वन्ति; ते तु देवानां प्रिया नैव वेदस्य वेदत्वं जानन्ति,—इत्यहो हो निर्वैदुष्यम्, प्राकृत शब्देन तु समीचीनतया हि ज्ञायते, प्राक्कृतः-पूर्वकृतः, प्राकृत निरु-क्तिस्तु-प्रकृष्टमकृतमकार्यमस्येति प्राकृतः। संस्कृतेन तु ज्ञायते, वेदशब्द संस्कार एव संस्कृतः; स तु बुद्धिमालिन्यात् ऋषिभिर्विरचितः, "वेदा न्नो वैदिकाः शब्दाः, सिद्धा लोकाच्च लौकिकाः"—इति स्मरणात् गीर्वाणभाषाव्यवहारस्तु वेदशब्देष्वेव, न ह्यन्येषु प्राक्कृतादिषु यतो हि—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"साक्षात्कृतधर्माण ऋषयो बभूवुः। ते ऽपरेभ्योऽसाक्षात्कृत धर्मभ्य उपदेशेन मंत्रान् संप्रादुः। उपदेशाय ग्लायन्तोऽपरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं वेदाङ्गानि च॥" १-६-५ कर्णपरम्परयैव श्रुतो वेदो ऋषिभिः, न लिप्याधीतः; यतो हि वेदस्यानुश्राविकत्वं सर्वत्र सर्वैरङ्गीक्रियते—

"ब्राह्मणेन न म्लेच्छितवै, नापभाषितवै, म्लेच्छो ह वा एष यदपशब्दः, म्लेच्छा मा भूम—इत्यध्येया गीर्वाणभाषा"

"अनादि निधना नित्या, वागुत्सृष्टा स्वयंभुवा।
आदौ वेदमयी दिव्या, यतः सर्वा प्रवृत्तयः॥
नाम रूपं च भूतानां, कर्मणां च प्रवर्तनम्।
वेदशब्देभ्य एवादौ, पृथक्-संस्था च निर्ममे॥
तेषां ये यानि कर्माणि, प्राक्सृष्ट्यां प्रतिपेदिरे।
तान्येव ते प्रपद्यन्ते, सृज्यमानाः पुनः पुनः॥
ऋषीणां नामधेयानि, याश्च वेदेषु दृष्टयः।
शर्वर्यन्ते प्रसूतानां; तान्येवैभ्यो ददात्यऽजः॥"

यद्यपि चाष्टादश विधत्वं विद्यायाः, तथापि—अनादि विद्यायां वेदविद्यायामेव च तासामप्यन्तर्भावः, यतः सर्वाः वृत्तयः—इति कथनात्, वेदादृते ऽन्यासां विद्यानां कर्तारस्तु मुनयः, मुनिभिर्बुद्धि-मालिन्यनिरासाय वेदस्य टीका इव विरचिता अन्ये ग्रन्थाः, वेदोल्लास एवाऽन्यद्यत्किञ्चिज्जगति वर्तमानम्; अतएव (वेदस्यैव पठन पाठनादिकमऽत्यावश्यकं द्विजानाम्) संस्कृतविद्यावलेनैवाऽस्मदीयाः पूर्वजा बुद्धिमन्त आसन्; तदनभ्यासेनैवाऽकस्मिकीयमवस्था वर्तमानकालिका संभूता, संप्रति त्वस्मदीयाः पूर्वजा वृद्धा अनभिज्ञा मूर्खतरा एव, यैस्तु मृत्तिकया शुद्धिरुक्ता, निस्वास्त आधुनिकं (साइनिसं) जानन्ति स्म, ते तु पुरुषाः पुरुषा एव—स्त्रियो वै स्त्रियः, यान्ति तु पुरुषा स्त्रियः केशैः—स्त्रियो वै पुरुषा मुण्डनेन भवन्ति, परं च—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"युगे युगे समुच्छिन्ना, रचनेयं परात्मनः ।
प्रसादात् कस्यचिद्भूयः, प्रादुर्भवति कामतः ॥"

पश्यताम्—

ये तु नन्दना अमरीकाशर्मण्यदेशीयाः पूर्वकाले ऽनभिज्ञतामाऽऽवहन्तिस्म, त एवाधुना संस्कृतविद्या पठनपाठनादिकं विधाय स्वनियमेन नियंत्रिता सर्वेषु वर्णेषु—सर्वासु जातिषु च मूर्धन्यभूताः सन्ति, पदार्थजातानामाविष्यकारेण स्वत एव सर्वे जना जानन्ति, सर्वप्रबन्धेन च ज्ञायते षोडशीं कलामाऽऽवहन्ति मान्यतमा ईसामतानुयायिनः, न केनापि द्वेषो वा रागः स्थितप्रज्ञस्य इति भवतामेव शास्त्रेषु दरीदृश्यते, येनात्मगुणेनयुक्तः संप्रति ईसामतानुयायिन एव, अस्माभिस्तु दोषबुद्ध्या सर्वे गुणाः परित्यक्ताः, असूयादिभिस्तु कथं विद्या प्राप्या इति मत्वा तद्व्यतिरिक्तानां सर्वगुणसागराणामीसाममतानुयायिनां शुभलक्षणा सुखतमा विद्यावीर्यवत्येवेति । शम् ॥

संस्कृत-रहस्यम्

(२) (पूर्वतोऽनुवर्तते)

(तृतीयः परिच्छेदः)

कषायपानाय सम्मेलनम्

विशेषराजपदाधिकारिणः श्रीमतश्वेतनानन्दस्य रमणीये विशाले उपवने मित्राणामासीदद्य मनमोहनस्य सम्मेलनंकनिष्ठभ्रातुर्यज्ञोपवीतसंस्कारोत्सवे। लवणाम्लाज्यपूर्णं नानाविधं मिष्टान्नं मधुराणि च विविधानि फलानि, प्रचुरं संम्भुज्य टेनिस (Tennis) बैड मिन्टन (Badminton) ताशपत्रादिकाः क्रीडास्सम्यक् संखेल्य सम्मिलिता बभूवुरतिथयो वसन्तपुष्पवाटिकायां कुमारायाशिषः प्रदातुमुपदेशान् कर्तुञ्च। उपदेशमन्त्रोच्चारणानन्तरं मित्राणामाग्रहेण गुर्जरप्रदेशादागतेन पण्डितप्रेमनाथेन कुमारं सम्बोध्य मन्त्राणामनुवादोऽपि हिन्दीभाषायां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आवितः। अतिथयश्च गृहयुवकयुवतयश्चोपविष्टा आसन् पुष्पवाटिकायाम्। पण्डितमहोदयस्य श्रीमतो गृहस्वामिनो मित्रस्य मधुरं वाङ्मयं कर्णगोचरतां विधाय सम्यक् तदर्थसङ्गतञ्चानुभूयैकत्रिताः सर्वे गृहस्वामिनोऽतिथयश्च गीतवादित्रैः भव्यं तमवसरं व्यतिनिन्युः। भगवतो दिनमणेर्गभस्तिभिः पश्चिमाशागोत्तुङ्गशिखरे विमलविशदहेमराशिप्रतिबिम्बवत्पीतताम्राद्यरुणरागरञ्जिते संध्यारुणकोशे च मन्दं मन्दं वहति शीतलमारुते वसन्तावसाने दिनेष्वेतादृशेषु कश्मीरदेशस्योपवनेषु अमन्दरागोद्रेकातिशयेन गीतवादित्रैश्चमोहितेषु मित्रवर्गेषु भगिनीप्रेमप्रफुल्लितनयनकमलेषु सुसृणां शान्ताकांताप्रभृतीनां च समाप्ते क्रीडाविहारे पण्डितप्रेमनाथमुपसर्पति शान्ता श्रावयति च परस्परालापं सखीजनस्याङ्गलभाषाविषयकं गतदिवसीयम्। वार्ताञ्चैतां तस्याः श्रुत्वा 'आम्! अस्माकमपि महाविद्यालयस्य पारितोषिकवितरणानन्तरमभून्महान् संवादः पूर्वपाश्चात्यसभ्यतार्यभाषाङ्गलभाषासंघर्षणविषयको गते दिने। इदानीं श्रीमन्त एव प्रमाणम्। दर्शयन्तु भवन्तः संस्कृतवाङ्मयस्योपकारं प्रभावं गौरवं प्रभुत्वञ्च अस्मद्देशभाषासु सभ्यतासु चे' ति कथयति मनमोहनः।

कृष्णः—सत्यम् पण्डितमहाभागानां मुखकमलादवश्यमेव श्रोतव्या एते विचाराः।

रामः—शोभनं कृष्ण! पण्डितप्रकाण्डानां पूर्वपाश्चात्योभयविद्यासागरपारंगतानां तु विश्वासयोग्यानीव वचांसि।

शान्ता—(पुष्पां बाह्यतो बलादानीय) मूढे! त्वयापि पण्डितमहोदयानामुपदेशः कर्णाभरणतां नेयः।

पुष्पा—पण्डितमहाभागाश्चेच्छ्रीमन्तो मामुपदिशेयुस्तर्हि विदेशीयां साटिकामपहाय मनोहरां सुन्दरां वाराणसीतः क्षौमां महतीं शाटीं क्रेणीयम्।

पण्डितप्रेमनाथः—संस्कृतवाङ्मयस्योपकारस्तु सर्वस्मिन् संसारे प्रसिद्ध एव। पूर्वपाश्चात्यार्याभिधाजातिभाषाणां मातृत्वेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्येष्ठभगिनीत्वेन वा स्वीकृतेयं सुरभारती। यादृशो विस्तृतः शब्दकोशोऽस्याः, यादृशाः शास्त्रनियमा एतां बध्नन्ति, यादृशं साहित्यं पुरातनैः पण्डितैर्नियमैः संस्कृते प्रकटितं न दृश्यतेऽन्यत्र तादृशमितरासु भाषासु। पाणिनिना महर्षिणा यत् व्याकरणं सूत्रेषुपबद्धं तत्तु सर्वथा वैचित्र्यावहमाश्चर्यजनकञ्चाद्वितीयमेव। दर्शनविषयेष्वपि षड्दर्शनानि प्राचीनभारतस्य गौरवं सर्वत्र संसार एधयन्ति। पाश्चात्यपण्डितैर्मोक्षमूलर (Maxmuller) मेकडानल्डमेधाविसिल्वयनप्रभृतिभिश्च विविधविषयेषु संस्कृतसाहित्यस्य वैदिककोशस्य च महिमा वर्णितः। याश्च सभ्यतां प्रदर्शयति संस्कृतवाङ्मयं सैव सभ्यता विद्वद्भिरिदानीमपि प्रशस्यते। किमाज्ञप्तं हिटलरमहोदयेन जर्मनप्रदेशेषु—नास्ति विदितं भवताम्? संस्कृतविद्याज्ञानं महाविद्यालयीयोपाधिपरीक्षार्थमावश्यकं निश्चितमिति श्रूयते। फ्रांसजर्मनहालैंडरूसादिषु पाश्चात्यदेशीयविद्यालयेषु सर्वत्रसंस्कृतमत्यन्तमेव सम्मानपदमारोपितम्। किं भाग्यहीनैराधुनिकैर्भारतैर्देववाणीयं न संरक्ष्या?

कृष्णः—धन्यवादार्हो भवान् यस्य कृपयास्माकं संशयो निवृत्तः। बहूनां प्राकृतभाषाणां प्रादुर्भावोऽपि संस्कृतादेव श्रूयते।

पण्डितमहोदयः—ओम् यथा पञ्जापकश्मीरमहाराष्ट्रवंगगुर्जरादिदेशीयभाषाशब्दा बहवः संस्कृतस्यापभ्रंशशब्दा एव तथा दिङ्मात्रमत्र प्रदृश्यते।

कश्मीरी	गुजराती	पंजाबी	हिन्दी	संस्कृत
—	—	मुँह	मुह	मुखम्
सुख	—	सुख	सुख	सुखम्
दुख	—	दुःख	दुख	दुःखम्
कुत्र	—	कित्थे	किधर	कुत्र
अथि	—	एत्थे	इधर	अत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ	—	हाथ	हाथ	हस्त
—	—	पैर	पैर	पाद
अच्छ	—	अक्षियाँ	आंखें	अक्षिणी
—	—	किवाड़	कीवाड	कपाट
—	—	वात	बात	वार्ता
गस		जा	जा	गच्छ
मा		माँ	माँ	माता
पिता		पिता	पिता	पिता
भाय		भाई	भाई	भ्राता
भिनि		भैन	बहिन	भगिनी

—o—

संस्कृत	मारवाड़ी	गुजराती	व्रज	मैथिली
अहम्	मी	हुं	हौ	मे (हम्)
बंगाली	ओरियाँ	अवधी	सिंधी	हिन्दी
मइ	मुँ	मैं	आऊँ	मैं

—o—

संस्कृत	प्राकृत	हिन्दी	गुजरातो	पंजाबी
सिन्दूरः	सिंदूरो	शेंदूर	सिंदूर	सिंदूर
पुस्तकम्	पोत्थअम्	पोथी	पोथा	पोथी
निमन्त्र	निमन्त	नेवता	—	न्योता
महिषी	म्हैस	भैंस	—	मैंह
मलिन	मैला	—	मैला	मैला
वलीवर्द	वहल्ल	बैल	—	बैल
तादृश	तादिस	तैसा		तैसे
चतुर्थ	चउत्थ	चौथा	—	चौथा
मरिचम्	मरिअम्	मिरिच	मिरि (मिरिच)	मरच

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाभागाः ! एतादृशा बहवः शब्दाः सन्ति येषां घनिष्ठो दृश्यते संबन्धः संस्कृतभाषया निरन्तरञ्च । किं बहुना प्रसिद्ध एवायं विषयो दिक्षु चतुर्षु ।

सर्वे——सत्यं साधितो भवद्भिरयं प्रश्नोऽस्माकम् । भोजनवेला च समुपस्थिता अतो यास्यामस्त्वरितं स्वानि स्थानानीति—

(कुलभूषणः)

शाब्दिकतत्त्वम्

[ले०—पं० शिवनाथ शास्त्री साहित्यभूषणः साहित्यमणिः]

शब्दानां जननी त्वमत्र भवने वाग्वादिनीत्युच्यसे
त्वत्तः केशव वासवप्रभृतयोऽप्याविर्भवन्ति स्फुटम् ।
लीयन्ते खलु यत्र कल्पविरमे ब्रह्मादयस्तेऽप्यमी
सा त्वं काचिदचिन्त्य रूप महिमा शक्तिः परागीयसे ॥

(धर्माचार्यपादाः)

खलु लोकेऽपि वेद इव शिक्षादिषडङ्गानां प्रायशो भाषायां कविकर्मणि च सर्वथावश्यकीय भावना । तत्रापि च्छन्दो व्याकरण विषयौ स्वत्यर्थं प्राथम्येनोपयोगिनौ, एतयोरभावे न कापि भाषा कविता वा भवितुं प्रभवति इति कविसमयः । यथा मनुष्यः पङ्गुत्वान्धत्वदोष दुष्ट अमनुष्य एव । आगमस्तु—"च्छन्दः शास्त्रं विना पङ्गु" विना व्याकरणेनान्धः" इत्यतो व्याकरणच्छन्दो विज्ञानस्य प्राथम्य मचलम् ।

तत्र तावद् व्याकरणविषये किमपि विचार्यते । किं तावद् व्याकरणं नाम ? विशेषेण क्रियन्ते शब्दस्वरूपा यत्र तद् व्याकरणं वा । म्लेच्छकरणकारणापशब्द निराकरणं प्रत्यक्षफलमस्य भगवता भाष्यकारेण शासितम्—"म्लेच्छा मा भूम इत्यध्येयं व्याकरणम् ।" अन्यत्रापि—"तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः । तस्माद्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्राह्मणेन न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदपशब्दः"। इति ॥ नीतिरपि—यद्यपि बहुनाधीषे तथापि पठपुत्र व्याकरणम्। स्वजनः श्वजनो मा भूत् सकलं शकलं सकृत शकृत् ॥ इति,

शाब्दिकस्यान्तिकादपशब्दहरिणा हरिसंत्रस्ताः शरणार्थिनो म्लेच्छाइव वनाद्वनं प्रधावन्ति। उक्तं हि—"वैयाकरण किरातादपशब्दमृगाः क यान्ति संत्रस्ताः। ज्योतिर्नटविटगायकभिषगाननगह्वराणि नहि स्युः ॥ इति, एवं हि शब्द शास्त्रस्याभ्यासो देवभाषा विलासोत्पादकः। अन्यथा सुरभारती शास्त्रेष्वेव समादरणीया भवेत्। न तथा सम्यगुद्धारो भवेद्यथा तत्र भयन्तः सुरभारती समुद्धरण बद्धपरिकरा वाञ्छिन्ति नित्यम्। उक्तं हि—"शब्दशास्त्रमनधीत्ययः पुमान् वक्तुमिच्छन्ति वचः सभान्तरे। बद्धुमिच्छति वने मदोत्कटं हस्तिनं कमलनालतन्तुना ॥" इति।

तत्र तावत्कया शक्त्या हरिकरीभूभृदादयः शब्दास्तत्रत्पदनिरूपित-देव हस्ति राजाद्यर्थेषु प्रवर्तन्ते। किमक्षरारायुत पदानि आहोस्विद्वाक्यानि तत्रतदभिधेयार्थ सञ्चालन सामर्थ्यवन्ति। चेद्वर्णा एव सार्थका इति मन्यामहे ? तर्हि "ङाजाटाणा" इत्यादयो वर्णाः किं निरर्थकाः। चेत्पदानां सार्थकता ? तर्हि "जर्बरी तुर्फरी पर्फरी" इत्यादीनि किं निरर्थकानि। वाक्यानि चेत्सार्थकानि ? "छटरोदसहस्राणि गटकारशतानि च।" इति पद्यार्धस्यानधिगमार्थत्वान्न तथा प्रतिभासते। तर्हि शब्दब्रह्मणि यान्येवाक्षराणि क्रमपरिपाट्या सुसंबद्धानि योजनिकया युक्तानि शब्दशास्त्रसाधूनि स्युस्तान्येव तं तमर्थं समुद्भावयितुं प्रभवन्ति, नान्यानि। भगवद्भाष्यकारशासनमप्यत्र—"सिद्धे शब्दार्थ सम्बन्धे" इति। नैरुक्तसमयोऽपि—नानिर्बद्धा उपसर्गा अर्थान्निराहुरिति।

एवं ह्यस्मिन् विषये बहूनां वादिनां बहुविधमतमन्तव्यता दरीदृश्यते। तासु स्फोटवादिनां मतमेवं प्रतिपादितमस्ति—स्फोटात्मैव.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दोऽर्थप्रतिपादकः। तथा चोक्तम्—"एको नित्यः क्रमविरहितः कल्पिता सत्यभागो वाक्यस्फोटो जनयति मतिं तादृशि स्वभिधेये। वर्णास्त्वेते प्रकृतिलघवः कल्पनैक प्रतिष्ठास्तस्मिन्नर्थे विदधति धियं नेत्यलं तत्कथाभिः॥" इति, तथाहि—चेद्वर्णानामर्थप्रत्यायकत्वम्। तर्हि वर्णाः ककारादयोऽर्थं प्रतिपादयन्तः समस्ता व्यस्ताः वा न तावद्व्यस्ता एकैक वर्णाकर्णने सतिचार्थ प्रतीतेरनुत्पादात्। सामस्त्यं हि पुनर्वर्णानां न संभवत्येव, तद्भिमन्तया स्यात्। सा चायुक्ता तथाहि वर्णप्रयोक्तॄणां प्रयत्नस्थान करणक्रमा परित्यागादवश्यंभावी क्रमः। क्रमे च सति ह्येकैक वर्णकारणिकार्थ प्रतीतिः प्राप्नोति। सा च न दृश्यते इति व्यस्तसमस्तविकल्पानुपपन्तेर्न वर्णा वाचकाः। वर्णविषया अपि बुद्धयस्तथैव कल्प्याः। ता अपि युगपन्न संभवन्ति। क्रमे च सत्येकैकवर्ण बुद्धेरर्थ संप्रत्ययः प्रसज्येत इति तस्मान्न वर्णा वाचकाः। यदि च स्युस्तद्विपरीत क्रमप्रयुक्ता अपि तमर्थमवगमयेयुः। अस्ति चेयं शब्दादुच्चारितान्तदर्थावगतिः न चेयमकारणिकैव भवितुर्हति। तदस्याः कारणं स्फोटः इति। सर्वथा अर्थप्रतीति लक्षण कार्यवशात् कल्प्यमानं तत्कारणं स्फोट इत्युच्यते। स च निखयो नित्य एको निष्क्रम इति। तस्माद्वर्णाभिव्यक्तः स्फोटोऽर्थे प्रतिपत्तिमादधातीति केचित्।

अन्ये तु—प्रथमवर्णश्रवणकाले स्फोटोऽभिव्यक्तः। नचैव द्विती-यादि वर्णवैफल्यं तदनुगतेरेवातिशयकारणात्। यथा रत्नपरीक्षायां प्रथमदर्शने रत्नममलं प्रकाशमानमपि पुनः पुनः परीक्षायां निरवद्यं रत्नतत्त्वं च कास्ति। एवं प्रथमवर्णश्रुत्या व्यक्तेऽपि स्फोढे स्फुटतरप्र-तीत्यै। वर्णान्तराणि प्रयोक्ष्यन्ते इति।

अपरे तु—ध्वनय एव स्फोटस्य व्यञ्जकाः, तैश्च महद्भिरनवयव एष स्फोटो व्यज्यमानस्ताल्वादिस्थानकरण-संयोगोपाधिपशोपप्लव-माननानाकार-ककारादि भागयोगी व प्रतिभासते। मरुतां चञ्चल त्वावुच्चारित प्रध्वंसिनस्ते काल्पनिका भागा भासन्ते। दृष्टंहि—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नादात्मको हि शब्दो वीणा वेणु मृदङ्ग पटहा दिव्यञ्जकभेदेन नानात्वमुपगच्छति। तस्माद्वाक्ये पदानामसत्त्वान्तदर्थे च पदानां निरवयवौ वाक्यवाक्यार्था विति। बाधकं चात्रावय कल्पनायां यथा वाक्यस्यावयवाः पदानि, पदानामवयवा वर्णाः, एवं वर्णानामप्यवयवैर्भाव्यम् तदवयनामप्यवयवान्तरैरित्यानन्त्यात् का व्यवस्था स्यात्। अतो यद्यवयव कल्पनातो विरम्येत, तद्वाक्य एव विरामः श्रेयान्। एवं पानकादिवत् पदार्थेभ्योऽन्य एव वाक्यार्थरूपः स्फोट इति। यथाहि पानकं फाणितमरिचादिभ्योऽर्थान्तरमेव। यथा च सिन्दूलाक्षा हरितालादिभ्योर्थान्तरमेव चित्रमिति। सिद्धमेतत्, तत्र तयोः स्फोट शब्द ब्रह्मणोरुभयोर्भेदे द्वैतापत्तिः। अभेदस्तु एवं स्यात्—यथापदे वर्णा न सन्ति, एवं वाक्येषु पदानि, तथा महावाक्येषूवान्तरवाक्यानि, ततो महाक्यान्यपि प्रकरणापेक्षया न स्युः, ततश्चैकमेव शास्त्रतत्त्वमविभागमद्वयमापततीत्याक्षिप्ते सति तत्र राधान्तः—सत्यमेतत्, शब्दब्रह्मैवेदमाद्वयमनाद्यविद्यावासनोपप्लवमानभेदमर्थभेदेन विवर्तते। शब्दब्रह्मणि निष्णातः परंब्रह्माधिगच्छति। न तु वाचकाद्विभक्तं वाच्यमपि नाम किं च नास्ति। तस्मात्काल्पनिक एवायं वाच्य वाच विभागः॥ इति स्फोटवादिनां मतिरिति।

'कृत दुरित निराकरणं व्याकरणं चतुरधीरधीयानः।
बुधगण गणनावसरे कनिष्ठिकायां परं जयति॥'

कन्या·विवाहसमर्थनम्

(ले०—श्री उभय वेदान्ताचार्यः सिंहासनाधिपति विद्वान् अभिनवसरस्वती वाङ्मुखरत्नकोशगुरुवर्यः नडादूर स्वामी कृष्णामाचार्यः, लक्ष्मीमन्दिरम् नाचियारकोयिल मद्रास)

श्रीरस्तु

आयुर्दीर्घमरोगतां प्रियवधूमैश्वर्यमव्याहतं
पुत्रान् भद्रगुणान् ददातु सततं सुत्राममान्यंपदम्।
पारावारसुता पयोधरतटीपाटीरपङ्काङ्कितः
श्यामः कामवितापितामहपिता लक्ष्मीनृसिंहो हरिः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ श्रीः ॥

ईश्वरं सर्व भूतानां धर्माधर्म फलप्रदम् ।
कान्तालिङ्गित वामाङ्गं नौमि स्वस्तिकरं महः ॥

आर्याः ! पण्डित पुण्डरीकाः !!

विदितमेवैतत्पण्डितपामराणां समेषामपि भारतभाग्यभूतानां यल्लोकोयं कुटिलतामावहतीति। इदानीं हि लोको महावात्यया पर्याकुली क्रियमाणा समुद्रमध्यगता महानौरिव चञ्चलो दृश्यते।

मान्याः ! असंख्येयेष्वन्याय्या कृत्य जातेष्वन्यतममिदं यत् "ऋतुमती विवाह पूर्वक विवाह वयो निष्कर्ष" रूपमशास्त्रीयं कर्मेति सर्वजनसंवेद्यमेव। इमं च विषयमधिकृत्य सर्वेऽपि मठाधिपतयः, सिंहासनाधिपतय श्रीमदाचार्यपुरुषाः, महामहोपाध्याय बिरुद भूषिताः, विद्वच्छिरोमणयश्च सर्वेऽपि स्वं स्वमाशयमुपन्यास रूपेण वाचनपत्रिकाभिश्च प्रकटी चक्रुः। उदीच्याः दाक्षिणात्याश्च विद्वांसः प्रकृतविषयमधिकृत्य खण्डनपूर्वकं सोपपत्तिकमुपन्यासादिकं तत्र तत्र विरचय्य स्वे षां महाजनानाञ्चऽशयादिकंमहाशयाय राज प्रतिनिधये प्रेषितवन्त इति विदितचरमास्तिकसार्वभौमानाम्।

आर्य आस्तिकशिरोमणयः ! अमेरिका (America) देशीय मेयो (Mayo) नाम्नी काचन अस्मद्भारत भुवं बहुधा दूषितवती। अन्यदेशीयाश्च केचन, एवमेवापरामृश्य वस्तुतत्त्वं बहुधा प्रलपन्ति मुद्रयन्ति च पुस्तकानि। अन्य देशीय भाषा वेष स्पृहयालवोऽस्मिद्देशीयाः केचन अन्यदेशीयैर्लिखितानप्यंशाननालोचयन्तः तांश्च तथ्यतयामन्वानाः अन्याय्यमशास्त्रीयं च कर्तुमनुमेनिरे। परमिदं खेदावहं सर्वेषामपि भारतीयानाम्।

सर्व लोकनिसन्तारस्त्रिमूर्तयोऽपि स्व स्व पत्न्याः प्राशस्त्येनैवहि महान्तमुत्कर्षमवापुः। लोकोहि पुरन्ध्रीणां महिम्नैव महनीयो भवतीत्यत्र निदर्शनञ्च सर्वजगत्कारणभूतस्सर्वेश्वरोऽपि श्रियः पति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वेनैवहि प्राशस्त्यमविन्दत। एवं गिरीशोपिकरुणामृत वर्षिण्या गिरिजयाहि अर्धनारीश्वर इति गीयते। तथा जगत्सृष्टिकर्ता चतुराननोऽपि सरस्वती जानित्वेन खलु महामहिमशाली संपन्नः। अपरिमितेभ्यः—"गो भूतिलु हिरण्याज्यवासो धान्य गुडानि च। रौप्यं लुवणमित्यादि दानं दशविधं स्मृतम्॥" इति प्रकीर्तितेभ्यः दानेभ्यः कन्यादानमेव गरिष्ठं वरिष्ठञ्च भवतीति सर्वशास्त्रानुभवसंवेद्यमेव। वरः माङ्गल्य ग्रन्थनावसरेः—

"माङ्गल्य तन्तुनाऽनेन मम जीवन हेतुना।
कण्ठेवध्नामि सुभगे त्वं जीव शरदश्शतम्॥"

इति वदन् ग्रथ्नाति। एवं सर्वजनसंवेद्यतया क्रियमाणे वैवाहिक मङ्गलविधौ जायापत्योः परस्परं प्रेमाङ्कुरितं भवति। ततश्च चान्द्रमसी कलेव नव नवोन्मेषशालि भवति। एतादृश कन्यादानाख्येन विधिना वधू-वरयोरुभयोरपि कुलं नितरां पवित्रितं भवति। एवं हि शिष्टाचारफक्किका। यथा शास्त्रं विवाह संस्कृतयोर्दम्पत्योश्शुभे मुहूर्ते संजातः पुत्रः द्वयोरपि वंशयोर्निवापाञ्जलि दानेन परमां तृप्तिं जनयति वंशाभिवर्धकश्चभवति। एतादृशः खलु कन्यका दानमहिमा। सुदंपति मूलमेवहि गृहस्थधर्माभिवृद्धिः। तत्तादृश गृहमेधिभ्य एव ब्रह्मचारिणस्संन्यासिनः अतिथयश्च अन्नादीनि लब्ध्वा जीवेयुरिति धर्मशास्त्रकारा आमनन्ति। किञ्च, कन्यादानकाले मातापितृभ्यामेवं संकल्प्यतेः—

"दशानां पूर्वेषां दशानां परेषाञ्चात्मनश्च एकविंशति कुलोत्तारण द्वारा नित्यानन्द निरतिशय शाश्वत ब्रह्मलोकावाप्त्यर्थं भगवत्प्रीत्यर्थं कन्यकादानाख्यमहादानं करिष्ये।"

कन्यां कनकसंपन्नां सर्वाभरण भूषिताम्।
दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया॥
विश्वंभरास्सर्व भूतास्साक्षिण्यस्सर्वदेवताः।
इमां कन्यां प्रदास्यामि पितृणां तारणाय च॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कन्ये ममाग्रतो भूयाः कन्ये मे भव पार्श्वयोः
कन्ये मे सर्वतो भूयाः त्वद्दानान्मोक्षमाप्नुयाम् ॥

तुभ्यमिमां कन्यां प्रजासहत्व कर्मभ्यः प्रतिपादयमिति वरं प्रति उच्यते देवस्यत्वाप्रतिगृह्णामि राजात्वावरुणो इति दानप्रतिग्रहदोष निवारणार्थं वरस्यप्रतिवचनम् वाक्येचास्मिन्परामृश्यमाने कन्यका दानस्य फलविचारे धर्मतत्वविदाएव शक्ता भवेयुः। भगवान् रघुनाथोऽपि स्वयं जानकी परिणयावसरे इमामेव परिपाटीमनुससार। किञ्च, जनकेनोक्तं "इयं सीता मम सुते" त्यादि वाक्य जातं परामृशन्तु सन्तः। "राघवत्वेऽभवत्सीता" इति सुभाषितानुसारेण भगवान् श्रीराघवावस्थायां सीतया सह लोके सनातनधर्मान् विधिवत्प्रतिष्ठापयामास।

कन्या नामः—

"अष्ट वर्षा भवेत्कन्या नववर्षा तु रोहिणी।
दश वर्षा भवेद्गौरी तत् ऊर्ध्वं रजस्वला॥"

विना कन्या विवाहं रजस्वला विवाह (प्रौढा विवाह) करणे निन्दा रूपं वेदोपबृंहित स्मृतिवचनं चः—

"पितुर्गृहेतु या कन्या रजः पश्यत्यसंस्कृता।
सा कन्या वृषली ज्ञेया तत्पति र्वृषली पतिः॥
वृषली पति भुक्तानि श्राद्धानि च हवींषि च।
पितरो न प्रति गृह्णन्ति दाता स्वर्गं न गच्छति॥" इति॥

अत्र च "वृषली" शब्दस्य एवं निर्वचनं कृतम्--वृषं-धम लुनातीति वृषलः (लूञ्-छेदने) धर्म विध्वंसक इत्यर्थः। तस्य स्त्रियामित्यर्थे ङीपि वृषली इति। एवमेव जोघुष्यन्ते श्रुति-स्मृत्यादयः। विस्तरभयान्नेहविलख्यन्ते। एतादृश रजस्वला दानेन च माता-पित्रोर्नभवति स्वर्गं लोकान्दानुभववः। तस्मात् कन्यादानाख्यमेव कर्म मुख्यतो द्विजातीनामावश्यकं भवतीति न च नविदितमास्तिकमहाशयानाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"गर्भाष्टमेषु ब्राह्मणमुपनयति" इति धर्मसूत्रेण द्विजाति बालुकानाम् उपनयनं विहितम्। तथैव कन्यकानाञ्च वैदिक सत्कर्म-रूपः उपनयन सोदरः विवाहाख्यो विधिः कन्यकावस्थायामेव, तथा चाष्टमेवयस्येवोद्वाहः करणीय इति सुप्रसिद्धमेव। वैदिक मता-वलम्बिनः सनातनधर्मेबद्धश्रद्धाः सर्वेऽपि कथंचिदपि कदाचिदपि वा नैनं शिष्टं मार्गं परित्यक्तुं शक्ता भवेयुः। इदानीमस्मा-कमनुष्ठानपदवीमारूढो विवाह विधिः पुरा कालेपि स्थितविवाह-सरणिमनुरुन्धान एव वर्तते इति सम्यगवगमयितुं श्री वैष्णवीय (४०००) चतुस्सहस्रदिव्यप्रबन्धनामके द्राविड पद्यरत्नैर्भगवती भूम्यंशभूता गोदा स्वप्न दृष्टोदन्त व्याजेन स्वीयविवाहपद्धतिं कस्यै-चित्सख्यै कथयामास। तादृश पद्यरत्नावलोकनेन इदानींतन विवाह संप्रदाय वदेव पुरापि सप्तपदी करणं, पाणि ग्रहणं, कङ्कण, बन्धनं, लाजहोमः, अग्नि प्रदक्षिणं, ग्राम प्रवेशः, माला परिवर्तनं, डोला-खेलनं, यामक लेपन, मित्यादयोऽशंः आसन्निति सम्यग्ज्ञायते। देवी च गोदा लोकानुष्ठानायोपदिदेशेति च स्पष्टमवगम्यते। तादृश-पद्यरत्नान्यद्यापि तत्संप्रदायिनो ब्राह्मणोत्तमाः वधूवरयोस्समक्षं तुरीये च विवाहदिने अनुसन्दधत इति विदितमिदं रसिकानाम्। एवमेव महाकवि सार्वभौमः कालिदासोपि शिवयोर्विवाह प्रकरणे प्रागुक्त लाज मोक्षादींश्चत्वत्र अरुन्धती ध्रुवदर्शनादीनि च वर्णयित्वा प्राक्तनीं विवाहरीतिं कुमार संभवे सप्तमसर्गे सम्यङ्न्यरूपयदिति च सुस्पष्टं सहृदयधुरीणानाम्।

सर्वानप्यंशान्पर्यालोचयतामस्माकं शिष्टानुशिष्ट कन्या-विवाह एव श्रेयानितिज्ञायते एवमेव द्विजाति व्यतिरिक्ताः क्षत्रिया-अपिकेरकीया अन्ये च राजवंशानुयायिनः स्वीय पुत्रीणां कन्यकानां कन्यका दशायामेवोद्वाहं कुर्वन्ति। एवं वैश्या अपि स्वीयकन्य-कानां वयसा न्यूनतमानमपि विवाहमनुतिष्ठन्ति। आनुभविको-यमंशः। हिन्दू (Hindu) व्यतिरिक्ताः मुस्लीम् (Muslim)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जाति प्रमुखा अपि कन्यकावस्थायामेव विवाहादि कुर्वन्तीति च ज्ञायते। मुस्लीम जाति प्रवर्तकः तदाचार्यभूतश्च नबिनायक नामा अष्ट वर्ष वयः परिमिताम् आयिषा (Ayisa) नाम्नीमुपयेमे इति कथयन्ति मुस्लीं प्रमुखाः।

किञ्च इतः पूर्वमस्मद्देशे प्रवृत्ता विवाहाः प्रायशः अष्टवर्षपरिमित कन्यकानामेव सञ्जाताः। उद्वाहिताश्चकन्यकास्ताः अरोग दृढ़ गात्राः पुत्रपोत्रवत्यः सतीपदनिर्देश्याश्च विराजन्त इति को वा न वेद। भारत-भाग्य भूतास्ता नारी मणय उत्तरेषु दक्षिणेषु चाऽसेतु हिमाचलं प्रकाशन्त इति च सर्वानुभूतांशएव।

एतादृश रहस्य जातान्यनालोचयन्तः वर्णाश्रम सनातनधर्मानविगणयन्तः सत्संप्रदायविध्वंसिनः ब्राह्मणसमुदायविद्वेषिणः वैदिकमताचारप्रतिपन्थिनः नास्तिकमतावलम्बिनः पण्डितंमन्य वैदिकसमयसमूलखनने बद्धश्रद्धाः राजकीयमहासभा द्वारा ऋतुमती विवाह वयोनिष्कर्षाख्यं कुकर्म नियमितवन्तश्च। तेन च सज्जनानां मनः खेदमुदपादयन्। ते च अवश्य कर्तव्येष्वन्यतमोऽयं विषय इति निर्णीतवन्तः!

तथा पुनरपि प्रयतन्ते यथा प्राचीन विवाह विधिर्निर्मूलो भवेत्। अहो! कलेर्माहात्म्यम् यदस्मिन्नेवभारत वर्षे दमयन्त्यनसूया जालायनी जानकी प्रभृतयो भगवत्यः पतिव्रताआसन्निति विद्मः। तादृशेऽस्मिन्नेव भारते इदानीं महापातकादि पापाचरणे प्रवृत्ता विलसन्ति विलासिन्य इति चिन्तयतामस्माकं नैवमनः प्रसीदति। आचारविहीनाश्चताः द्वचक्षुणुका क्षरादि (Coffce-Tea) पानेषु सदाऽऽसक्त चित्ताः सत्कर्म विद्वेषिण्यो भूत्वा पश्चादतीव कष्टान्दशामनुभवन्तीति च सम्यग्जानीमः। यदीमाः प्राचीन पथमनुरुन्ध्युस्तदा एतादृश दुराचार प्रवर्तका भवेयुर्वा? प्रकृतमनुसरामः। यदि रजस्वला स्त्रीणां बहुकालादनन्दरं विवाहः क्रियेत तदा अचिराच्चः वन्ध्या भवे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युरिति आयुर्वेद प्रवीणाः कथयन्ति। स्त्रीणां पठनोपरोधो भवति बाल्यविवाहादिना इतीममाशयमवलम्ब्य विवाहवयोनिष्कर्षमकुर्म इति यद्यस्मत्प्रतिपन्थिनः कथयेयुस्तर्हितदा महाननर्थः महांश्च-दोषोऽकृत्य करणेन संभवत्येवेति मुक्त कण्ठं निवेदयामः। विना स्त्रीत्वं विना पुंस्त्वञ्च सर्वमपि व्यवस्थारहितं भवेदित्यत्र न क्वापि संशीतिः।

न पामरोपि जनः अन्येन क्रियमाणं स्वीय धर्मपत्नी हस्त संस्पर्शनं (Shake Hand) सहेत। स्त्रियश्चाऽधुनिक्यः अन्यदेशीय भाषावेषलोलुपाः परस्परहस्तस्पर्शनादीनि अन्याय्यानि कर्म जातानि कुर्वन्ति। नहि सर्वा नार्य एवं विद्यन्ते अपितु याः काश्च न वराक्य एव। गतेष्वेवं कतिपय दिवसेषु स्त्रियएवस्त्रियमुद्वाहयेयुरिति च प्रतिवक्तुं युक्तम् भात्यस्माकम्।

"अङ्गार सदृशां नारी घृत कुम्भ समः पुमान्।"

इति वचनमसकृत् पर्यालोचयन्तु सन्तः॥

यदि परस्परं स्त्री-पुंसयो हस्तस्पर्शनादिकमनिशं भवेत् तर्हि तदा चित्तवृत्तिरप्यन्यथा भवेत्।

किञ्च इदानीं नियमित प्रौढा विवाह विधेरुल्लङ्घने महान्दण्डो विधीयेतेति च तैर्निरणायि।

सुसदृशमेवेदमुत्पश्यामः, यद्वरान्वेषणाय बहु परिश्रम्य कृच्छ्रोणसुखितस्य चरणयुगलस्य निगडबन्धनं कन्यादानं कृतवतो हस्तस्यनिगलबन्धनादिकञ्च। सुष्ठु खलुपरामृश्य विहितोऽयं दण्ड इति विशदमतीनां शेमुषी वैभवञ्च पर्यालोच्य प्रमोदं खेदञ्चानुभवामः। न वयं शक्नुमः तत्प्रतिकर्तुम्। अपितु सएव सकल लोकसाक्षि भूतो जगदीश्वरः प्रतिविधास्यतीति प्रार्थयामहे तमेव भगवन्तम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिरकालादारभ्य महर्षिभिः प्रवर्तितोऽयंसंप्रदायः न केनाप्यन्यथाकर्तुमुचितः। नियन्त्रितो विवाहयोर्निष्कर्ष शिष्टाचार बहिर्भूतएवेति मुक्तकण्ठं वदामः। प्रौढा विवाहेन महाननर्थएव संपद्यते न सुखलेशोऽपि। श्रीमत्या महाराज्ञ्या विक्टोरिया (Victoria) नाम्न्या यत्प्रतिश्रुतं हिन्दु सनातन धर्मेषु राजकीया न प्रविशेयुरिति न वा विरुद्धमाचरेयुरिति च तादृशाज्ञोल्लङ्घनमनुचितमेव।

अन्ततः मदीयेयमभ्यर्थनाः—यथा वा एष नियमः अनुष्ठान पदवीं नारोहेत् वर्णाश्रमसनातनधर्मपरम्परा यथा च न भञ्जिता भवेत्तथा सर्वैरपि महानुभावैरास्तिकाग्रेसरैर्यतितव्यमिति। सनातनधर्म परिरक्षणे सर्वेषामपि जनानां यथा चोत्साहस्संजायेत तथा तत्र-तत्र विद्यमानैः पण्डितैरुपन्यासादिकं च करणीयमिति पुनरपि सप्रश्रयं निवेद्यते।

नडादूर् कृष्णमाचार्यः प्रार्थयत्ययमादरात्।
श्रीमल्लक्ष्मीनरहरेस्सत्कटाक्षादहर्निशम्॥

[अस्मिँल्लेखे लेखकमहोदयेन ये विचाराः प्रकटिताः। तैः सहास्माकं नितरां मतभेदोस्ति। लेखेस्मिन् प्रदर्शितविचारधारा समयप्रतिकूला, ब्रह्मचर्यसदाचारविरोधिनी शारदाएक्टोल्लंघिनी काश्मीरराज्यराजनियमविपरीता। ये महानुभावाः एतल्लेख विषये मतभेदं प्रकटयितुमभिलषन्ति तेषां लेखा सामोदं प्रकाशयिष्यते।

—सम्पादकः]

080529
गुरुकुल काङ्गड़ी विश्वविद्यालय हरिद्वार

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत साहित्य परिषदः श्रीनगरस्य श्रियश्च नियमाः

उद्देश्यः—

परिषदोऽस्याः केवलमेकएवउद्देश्यः संस्कृतभाषायैसभ्यता रक्षार्थं प्रचारः ।

नियमः—

सभासद्स्तु न्यूनान्न्यूनं आणकानां चतुर्णां प्रतिवर्षं दानेन सर्वे भवितुमर्हन्ति उपरिनिर्दिष्टमुद्देश्यमुररीकृत्य ।

श्रीः पत्रिका

एतत् प्राप्त्यर्थं १।) श्रीनगरात् भिन्ननगरस्थेभ्यः । १) श्रीनगर स्थेभ्यश्च शुल्करूपेण धनमपेक्ष्यते । अनेनैव पत्रिकापि लभेत सभासत्त्वमपि च भवेत् ।

सहायता

परिषदो व्ययः पत्रिकाया अस्याः कृते शुल्कादत्यधिकं भवति, यदि शुल्कं सर्वेभ्योऽपि आगच्छेत् । परन्तु धनाभावात् बहवः संस्कृतज्ञाः छात्राः ब्राह्मणाश्च विनामूल्येनैव लभन्ते पत्रम् । अतः सहायतारूपेण किञ्चिद् धनमस्यै अवश्यमेव संस्कृतोद्धारप्रणयिभिर्दातव्यम् ।

पत्रप्रकाशनसमयः

त्रैमासिकं पत्रमिदं सौरवर्षस्य चैत्र, आषाढ़, आश्विन, पौष मासेषु निर्गच्छति । पत्रप्रकाशनमासानन्तरमपि पत्रस्यानुपलब्धौ सूचनाप्रेषणेन पुनरपि प्रेषयिष्यते पत्रम् । मासादनन्तरं तुपत्रं न प्राप्यते ।

पत्रव्यवहाराः

लेखप्रेषणाय पत्रप्रबंधाय च निम्नाङ्कितेन प्रत्ययेन पत्रव्यवहारो विधेयः

चैत्र १९९१
अप्रैल १९३५

कुलभूषणः
परिषन्मन्त्री
श्रियः सञ्चालकः
स. सम्पादकश्च
सुन्वार बाग़, श्रीनगर, (काश्मीर)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भीमसेन विद्यालङ्कार के प्रबन्ध से
नवयुग प्रिण्टिङ्ग प्रैस, १७, मोहनलाल रोड, लाहौर में छपा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri